कएवव्यंग्यश्च।प्रकरणादिविशेषसहायतयाअनेकइतिवाच्यव्यंग्ययोःसंख्यायाभेदेपिविषयभेदादपिव्यंग्यस्यवाच्याद्भेदंदर्शयतिकस्सवेति
कस्येवानीर्ष्यालोरपिनभवतिरोषोविलोक्यप्रियायाः सव्रणमधरं।सभ्रमरपद्माघ्राणशीलेशीलेहिनकथंचिद्वारयितुंशक्यं।वारितेवारणायां
वामेतदनंगीकारिणिसहस्वेदानीमितिवाच्यमविनवतीविषयंभर्तृविषयंतत्।पराधोनास्तीत्यावेद्यमानंव्यंग्यं।तत्सपत्न्यांचनदुपालंभनदवि
नयप्रहृष्टायांसौभाग्यातिशयख्यापनंप्रियायाइति।शब्दबलादितिसपत्नीविषयंव्यंग्यं।सखीमध्येदयिता।स्वस्त्रीकृतास्मीतिलाघवमात्मने
नग्राह्यंप्रत्यक्षतायंबहुमानःसहस्वशोभस्वेदानीमितिसखीविषयंसौभाग्यख्यापनंव्यंग्यंअन्येयंतथप्रच्छन्नानुरागिणीमयेक्षंरक्षितापुनः
प्रकटदर्शनरहनविधिर्नकार्यइत्यत्रपपत्तिविषयंव्यंग्यं।नान्यथास्यांसंभावनीयमितिप्रातिवेश्मिकविषयंव्यंग्यं।युक्तामयासंवृत्तोपराधः

सख्याइतिस्ववैद्ग्ध्यख्यापनंविद्ग्धविषयंव्यंग्यमित्याहसरबीतत्कोताहीतिभेदेपीति।स्वरूपभेदात्कालभेदादाश्रयभेदात्कारणभेदात्कार्यभेदात्संख्याभेदादिषयाभेदाच्चवाच्यव्यंग्ययोरत्यंतंभेदः।तथावाचकानांसमयनियमितानिधाव्यापाराणांशब्दानां।व्यंजकानांत्वनुक्तवर्णादीनामर्थानिरपेक्षणामनियतव्यंजनशक्तीनांकथंनवैलक्षण्यमित्याहवाचकानामिति।यत्परःशब्दसशब्दार्थइतिपुनर्दूषयन्नाहकिंचेति।वाच्यंस्वरूपणचेति।वाच्यार्थप्रतिपत्तिपुरःसरंप्रतीयमानार्थप्रतीतिस्तदनंतरंचतृतीयकक्षायांवाच्यप्राधान्यात्स्वरूपणैवविश्राम्यतिचारुरूपविश्रांतिस्थानाभावेव्यंजकत्वव्यापारोनोन्मीलतीतिप्रत्याद्यस्यवाच्यस्यस्वरूपणैवविश्रांतिःक्षणदृष्टनष्टदिव्यविभवप्राकृतपुरुषवत्।अतात्पर्यभूतोपीति व्यंग्यस्याःप्राधान्येवाच्यत्वंतावन्नात्पर्यार्थवादिभिरपिनाभ्युपगम्यतेःतत्परत्वाच्छब्दस्येतिवाचकत्वादन्यदेवव्यंजकत्वं।स्वशब्दानभिधेयइतिरसादिरूपः।कस्यव्यापारस्येत्यर्थात्व्यंजनव्यापारस्यैवेतिव्यंग्यपरत्वेपिकाव्यस्यनव्यंग्यस्याभिधेयत्वंकिंतुव्यंग्यत्वमेव।वाच्योर्थएकएवेतिनियतोसौव्यंग्यस्तुप्रकरणादिबलादनेकइत्यादिःप्राक्प्रतिपादितोवाच्यव्यंग्ययोर्भेदोपिसव्यभिचारोन्यत्रापिदर्शनादितिपुनःपूर्वपक्षयन्नाहननुरामोस्मीतिअत्रवनवासादिरनवधिर्लक्ष्योर्थः।ग्रंथव्याख्यानायषःकृतंसमुचितंकूरेणतेरक्षसासोढंतच्चतथात्वयाकुलजनो

धत्तेयथोच्चैःशिरः।व्यर्थेसंप्रतिबिभ्रताधनुरिदंत्वद्यापदःसाक्षिणारामेणप्रियजीवितेनेति।अत्ररामपदंसाहसैकरसत्वादिलक्ष्यार्थसंक्रमितवाच्यंव्यंजकं।विशेषव्यपदेशेतियथाव्यंग्यबोद्धुर्विद्ग्धइतिव्यपदेशास्तथालक्ष्यार्थबोद्धुरपिलक्षकइतिविशेषव्यपदेशाद्दृश्यंतेसमानं।अनेकार्थशब्देतिगोशब्दार्थवत्।नरवधिति।यथागंगायांघोषइत्यादौमुख्येनगंगाशब्दार्थेनतदादिर्लक्ष्यतेनतथाधनादिरपिलक्षयितुंशक्यते।व्यंग्यस्तुविचित्रःप्रकाशनेप्रकरणादिसामग्रीवैचित्र्यात्।क्वचिन्नाभिधामूलेध्वनौलक्षणांविनापिव्यंजकत्वमित्याहनचेति।गाथेयंसप्तशतीयोद्धासेव्याकृता।अभिधापुच्छभूतेति।अमुख्ययावृत्त्यासंकेतग्रहणमपिनास्तीत्यभिधाशेषभूतेवलक्षणातोभिधाव्यापारमाश्रितासद्ध्वनेर्नोत्थानात्कथंध्वनेर्व्यंजनात्मनोलक्षणंस्याद्भिन्नविषयत्वात्।नचलक्षणेति।नहिलक्षणैकरूपमेवध्वननेलक्षणानुगमेनध्वननस्यदर्शनात्।यथागंगायांघोषइत्यादौनचलक्षणानुगतमेवध्वननंविवक्षितान्यपरवाच्येभिधामूलत्वेनध्वननस्याभावात्नहिव्यंग्येप्रतीयमानेवाच्येवुद्बुद्धिर्भवति।नचोभयेति।अभिधालक्षणानुसारेणैवध्वननमित्यपिनेत्याह।अवाचकेति।ललितपरुषादिवर्णानुप्रासस्यार्थाभिधानानुपयोगिनोपिरसंप्रतिव्यंजकत्वस्यदर्शनात्।नचवर्णमात्रानुसारेणैवध्वननमित्याह।शब्दात्मकेति।अभिधाव्यापारेणास्पृष्टइत्यर्थः।यथामय्याशं

कनादित्यादिग्राह्याच्छब्दव्यतिरिक्ताधोवलक्त्वकुच कंपनबाष्पावेशादि।तस्येतिध्वननस्यध्वननादिपर्यायइति।अस्तिनावच्छब्दस्यव्यापा
रःसचनाभिधानात्मासमर्थाभावात्।नतात्पर्यात्मातस्यान्वयप्रतीत्तावेवपरिक्षयात्।नलक्षणात्मास्खलद्गतित्वाभावात्।तत्रापिस्खलद्ग
तित्वेपुनर्मुख्यार्थबाधानिमित्तंप्रयोजनमित्यवस्थास्यात्।तस्माद्गभिधादिव्यापारव्यतिरिक्तश्चतुर्थोसौव्यापारोध्वननद्योतनप्रत्यायनाव
गमनादिपर्यायोभ्यपगंतव्यएव।तत्रेतिनेषुनियतसंबद्धादिषुमध्येनियतसंबद्धइति।अत्रेवशब्देतिपुरुषाभ्यर्थनलक्षणाविधिर्व्यंग्यः।अनि
यतसंबद्धइति।पतिविषयेहिसतीत्वप्रकल्पनादिव्यंग्येसपत्नीप्रभृतीनांचान्यदिति। संबद्धइति।संबद्धस्यव्यंग्यस्यसंबद्धोःपरोव्यंग्योर्थःये
प्याहुरिति।अखंडवाक्यवाक्यार्थवादिनोभट्टाः।वाक्यार्थमतयेहिपदार्थानांप्रवृत्तौनांतरीयकंपाकेक्लृप्तेबकाष्ठानामिति।पदार्थानामविद्यमान
त्वान्नस्ववाचकेसंबंधग्रहणमुपपद्येइतिग्राह्यावगतेःपदार्थैस्तात्पर्येणयोःर्थउच्यतेसरावबाक्यार्थःसरावबाक्यइत्याहुस्तेरपिदेशकालाव
च्छेदेनाःशब्दव्यवहर्त्तृनिश्चतयाकल्पितपदार्थसंश्रयेणवाक्यबाक्यकल्पनाकियतएवेतितन्मतेपिग्राह्यस्यार्थांतरप्रतीतौव्यंजकत्वमेवनवाचक

त्वं।एवंपदार्थवार्थबाक्यार्थन्यायेनात्पर्यशक्तिसाधकेनिराकृत्यप्रकृतेव्यंजनशक्तिंयोजयितुमाहतत्पक्षेपीति।उक्तोदाहरणाद्दाविनिःश्रेयसत्यादौ।
अनुमानवादीत्याहव्यंजकत्वंशब्दोनोगमकत्वंतच्चलिंगत्वमतोव्यंग्यप्रतीतिर्लिंगिप्रतीतिरेवेतिव्यंग्यव्यंजकभावोलिंगिलिंगभावएवेत्याह।वाच्यादसंब
द्धमिति।संबंधादितिकार्यकारणभावमूलस्यगम्यगमकभावस्योपगमात्।अप्रतिबंधइति।अव्यभिचाराभावेनभवतिकिंतुव्यंग्यव्यंजकभावःप्रति
बंधेःव्यभिचारेणवस्यादितिव्याप्तिः।यथाग्निरत्रधूमादिति।नियतधर्मिनिरूपत्वेनेति।अनेनान्वयव्यतिरेकप्रतिपादनेरपक्षसत्वविपक्षाःस
त्वभणनमित्यर्थः।त्रिरूपादितिपक्षधर्मःसपक्षसत्वंविपक्षात्।व्यावृत्तिरितित्रिरूपंलिंगं।येनस्वीनोर्थोगम्यतेप्रतिपाद्यतेतल्लिंगंबोद्धानां।लिं
गिनीतिअनुमेयं।तद्रूपइतिपर्यवसानेअनुमानरूपएवव्यंग्यव्यंजकभावइत्यर्थः।एतदेवोदाहरणेनदृढयतिग्रामेति।प्रथमोल्लासेच्याकृतासिं
हस्याचेक्षोर्निर्भर्त्सहेवाकिनःश्रवधाभिधानंजातिविरुद्धमित्यनुचितंननोदरिउरिरंखणेत्यन्येपठंति।ग्रहइति।यत्रग्रहेसादुःशीलाविद्य
नोग्रमणइतिग्रमणविधिर्बाच्यस्तत्प्रतिषेधस्त्वनुमेयः।तत्रगोलाणइकच्छकुडंगवासिणेतिगोदावरीकस्थकुहरस्यधर्मित्वनिर्देशः।दरि
असीहेणेतिश्वमारणकारणाभिधानद्वारेणापात्तस्यदरसिंहसद्भावस्यहेतुभावः।कुडंगवासिणेतिनद्दिशेषणेननस्यधर्मिणिसद्भावोप

का॰श॰दी॰ दर्शनं।यद्यदिति।भयकारणंनिवृत्तिर्व्यापिभीरुत्रमणंव्याप्यंसिंहसद्भावश्चव्यापकविरुद्धोपलब्धिरेकादशविधानुप्रकृभमध्येऽनुमानभेदः।यथा
नात्रतुषारस्पर्शोऽग्नेरितिअत्रेति।धर्मीतुषारस्पर्शोनेतिसाध्यं।वह्नेरितिहेतुर्व्यापकविरुद्धोपलब्धिः।तुषारस्पर्शःप्रतिषेध्योव्याप्योव्यापकश्च
शीतस्पर्शः।अत्रेति।पूर्वपक्षेउच्यतइतिसिद्धांतःअनेकांतिकइतिसव्यभिचारः।तत्कथमितिअनेकांतिकविरुद्धासिद्धानामहेत्वाभासादूषण
मनुमानस्य।स्नानकार्यत्वेनेतिस्नानंकारणांतरं।व्यक्तियादिनेति।व्यंजनव्यापारचादिनाचंदनत्यवनादीनांलिंगानामधमपदसहायतयायत्क
स्मिंतमनुमानंतदपिनेवेत्याह।नचात्रेति।प्रत्यक्षादिप्रमाणांतरप्रतिपन्नोह्यर्थोनुमानांगंधूमवत्।उपपत्यनपेक्षत्वेपीति।काव्यविषयेहि
वाच्यव्यंग्यप्रतीतीनांसत्यासत्यनिरूपणंनप्रयोजकंनहितेषांवाक्यानांअग्निष्टोमादिवाक्यवत्सत्यार्थप्रतिपादनद्वारेणप्रवर्त्तकत्वायप्रामाण्य
मन्विष्यतेप्रतीतिमात्रपर्यवसायित्वात्प्रीतिरेवचास्लौकिकचमत्काररूपाव्यंग्या॥ ॥ ॥

रसस्यार्थस्योपकारकाः। सदृतिदोषः। रसस्यापकर्षहेतवोदोषाः एवंगुणाअपिरसस्योत्कर्षवइतिवक्ष्यते। दोषगुणाश्चरसस्येवधर्माउपचारेणतुतदुपकारि
णोः शब्दार्थयोरुच्यंतेरसाश्रयत्वंचगुणदोषयोरन्वयव्यतिरेकानुविधानात्। तथाहियत्रैवदोषास्तत्रैवगुणारसविशेषेचदोषानतुशब्दार्थयोः। यद्हिस
योः स्फुटत्वंहिभासादोकरत्वादयोगुणनभवेयुर्हास्यादोचाश्लीलत्वादयः। अनित्याश्चैतेदोषायतोयस्यांगिनस्तेदोषास्तदभावेनदोषास्तद्भावेतुदोषाइत्य
न्वयव्यतिरेकाभ्यांगुणदोषयोरसएवाश्रयः। निर्दोषेगुणालंकारसहितौशब्दार्थौकाव्यमितिपूर्वंपरिहार्यत्वेनदोषौवाच्यस्तत्रपदारब्धत्वाद्वाक्यस्येतिप्रथमंपदस्य
शब्दस्यदोषानाह। दुष्टमिति। अनंगमंगरुग्दुष्टंचासौ अपांगश्चतस्यभंग्याविच्छित्यातरंगितेरुपलक्षेतया। श्यामोद्रंचनदंपांडुरप्रांतंचेतिकर्मधा
रयः। स्यर्शक्षममिति। स्फुरत्तरसंमर्दसहं। प्रकटपयोधरदर्शनोत्थरागेणपुलिंद्यास्त्वांसेवमानानेवंवीभूतीताः कुरंजेकुभानघ्नंतीत्यर्थः। यथावागं
डीवीकनकशिलानिर्भुजाश्यामाजघ्नेविषमविलोचनस्यवरुः। अत्रहंतेर्नाकर्मकत्वंनस्वांगकर्मकत्वमित्यात्मनेपदाप्राप्तेराजघ्नेपदमसा
धकमाम्नातमपीति। शास्त्रमात्रप्रसिद्धत्वाच्चश्लोकमात्रप्रसिद्धत्वाच्च। दैवतानिपुंसिवेतिदैवतशब्दःपुल्लिंगेस्त्रीलिंगानुशासनएवप्रसिद्धः। श्लोकमात्रे
प्रसिद्धंयथाकष्टंकथंरोहितिभूल्लतेयं। देश्येचैतन्नियतदेशविषयत्वेनप्रसिद्धं। यदाह। प्रकृतिप्रत्ययमूलाव्युत्पत्तिर्नास्तियस्यदेश्यस्य।तन्मड

DS BHANDAR

हादिकाथंचिन्मरूढिरितिसंस्कृतेरचयेत्। मडहलडहहोराणकंदोट्टपरुषादिक्रमास्त्रंभश्चेष्वस्तउत्पलहरिद्राबाचकंरूढिप्रांत्यानवध्यतेकश्चिद्
स्वदेशप्रसिध्याः स्यार्थस्यशब्दोयंबाचकइतिमन्यमानः प्रयुंजीत। व्युत्पत्तिर्यस्यनास्तीतिवचनात्सव्युत्पत्तिकंकदाचित्प्रयोज्यंयथादूर्वायांछिन्नो
द्भवाशब्दःतालेभूमिपिशाचः। शर्वेमहानटः चंद्रामृतयोः समुद्रनवनीतंजलेमेघक्षीरमित्यादि। गमनार्थमिति। गत्यर्थेपिहंतीत्यत्रहिनस्तीतिप्राचीन
नेनतुगत्यर्थः। गत्यपदेशस्तुहंसार्थः। हंतिगच्छत्याशास्थितिं। यमकादौतुगत्यर्थोपिदृश्यते। निर्हितार्थमिति। असमर्थदोषेणकस्मिन्नेवार्थेप्रसिद्धिरत्र
तूभयत्रापिप्रसिद्धिः परमेकत्राविवक्षितत्वमनयोर्भेदः सन्निधिरितियागयुक्तेः। उत्फुल्लेति। अत्रैकवचनेनभगवतीसंबोध्यप्रसादसंबंधेनमस्तस्यबहुत्व
निर्देशः सवचनप्रक्रमभंगोपि। तथोत्फुल्लकेसरगौरशब्दानांपौनरुक्त्यंचयथाकदस्थलप्रोषितहानवारिभिः। अत्रहिहानवारिप्रवासस्ययकदस्थलमव
धिभावेनविशेषणंतत्पुनरुक्तमव्यभिचारात्। अवंध्यकोपस्यसामर्थ्यस्यापि। दंनिहंतुरुदारस्यनत्वनुदारत्र्यापरोनिहंतीत्यनेनपदेनोदारत्वंविवक्षितं
जेतुनेति। जेतुमात्रेणादानेत्यर्थः कृतस्नेहेनाहरःदरोरमंच। हाधिगिति। यस्योरात्रौकामिनीदृष्टातासामसीतमोमयीरुन्नादिनेतुसानदृष्टातन्नादि
नेप्रकाशमयंकल्पितं। कुशलेभद्रकेकर्तव्येविधुरोवैरीजंघेतिजानुः धस्ताज्जंघा। हरन्नन्तमनुकर्तुप्रवर्तायागोर्याभ्यारीक्रमेषूर्ध्वंदूः पादादुपादः

विपूर्वोधाञ्करणार्थइतिविभ्रदित्यर्थेःवाचकः।तथासमासोक्तेःदण्डपादस्योभोजनुत्मत्वेःवगतेयत्तस्योभोजशोभांविरधतितस्पुनरुक्तं।यच्चो
भोजस्यार्थमुपमानत्वमुपात्तंतदप्ययुक्तमेवतस्योरुनाऊत्वादिधर्मसंबंधोपगमयोग्यत्वानुपपत्तेःकेवलमेकेनैवसमासोन्तर्भावानापीसंभूतत्वेनास्य
विशेषणविशेष्यभावःसंगच्छतेकिंतुसमासएववक्ष्यमाणनयेनानुपपन्नइवप्रक्रमभेदप्रसंगात्।नचदण्डपादस्यतत्संबंधोघटिष्यतेइतिशक्यतेवक्तुंतस्य
तद्धर्मसंबंधाभावात्।नेनोभोजस्यशाद्दमुपानत्वंवादण्डपादस्यवोभोजत्वेनरूपणंकर्त्तव्यंयेनास्यप्राधान्येसतिविशेषणसंबंधोपगमयोग्यतास्यात्।किं
चभर्तुर्नृत्तस्योद्भूतस्यतांडवात्मनोयोनुकारस्तस्यदण्डपादविषयभावेनोपादानाज्जंघाकोडनालत्वविशिष्टतयासंस्थानविशेषवशाच्चपादस्यदण्डा
कारतापिनवत्वंवेत्स्यामममप्यवगतमिति।ननत्पुनरुपादेयतामर्हतीत्यत्रवरमयंपाठस्तेस्तावण्यवापीसंभूतोभक्तिभाजोभवद्वदनःपादप
द्मोभवान्याः।एवंविरधादित्यपिकरोत्यर्थेनिरस्तं।यथावायमिंद्रशाद्दार्थनिरुद्दनंहरेर्हिरण्यपूर्वेकशिपुंप्रचक्षते।अत्रहिरण्यकशिपुमितिवक्तव्ये
हिरण्यपूर्वेकशिपुमित्यवाचकं।यतोत्रहिरण्यशाद्दःकशिपुशाद्दश्चाभिधेयस्यःजीवत्योर्हिजायायांतत्केशाकलापःकिलसपत्नोःभवत्।एतदिति
हिंसादिकंविभावरीकोतश्चेद्दः।लाक्षणिकमितितन्नेयार्थमितियोगः।रूढिप्रयोजनंवाचिनास्वधियैवलक्षणयाप्रयुक्तं।यथानुरेगकोतानन

हव्यवाहशाद्दोवडवामुखेाग्नेोचपेटेतिपुंस्यपिनिर्जितत्वंलक्ष्यतइति।ततःसाम्यमाधिक्यंवेतिनेयार्थता॥अत्रलोचनेति।अत्रेकपदप्रत्याय्यो
ऽर्थःकुमुदलक्षणोःश्रीलाद्यनेकपदार्थपर्यालोचनाव्यवहितत्वेनक्लिश्यमानोवाचकस्यक्लिष्टतामावहति।मिथ्यामहिमामिति।पुररक्षणास
मर्थत्वात्।विधेयमिति।समासेगुणतांनीतं।द्वितीयात्वमात्रमितिमौर्वीहिधनुषःसामान्येनसिद्धानतुद्वितीयात्वंद्वितीयमौर्वीमिति।समस्तेनिर्देशो
द्वितीयाशाद्दार्थस्यगौणत्वंविशेषणभूतत्वात्।तेनमौर्वीद्वितीयामितियुक्तःपाठः।नचैवंगुर्वंतताभावेष्टस्यभंगः।तस्यश्चव्यक्तामात्रलक्षणत्वात्दंते
पेक्षयैववसंततिलकादावियगुर्वंततानियमस्यसकर्णकैरप्याद्यनादृतत्वात्।यदुक्तंवंशस्थकादिचरणोतनिवेशितस्यगत्वंलघोर्नहितथाश्रुति
शर्मदायि।श्रोतुर्वसंततिलकादिपदांतवर्त्तेलोगत्वमत्रविहितंविबुधैर्यथातत्।जनिरिति।जन्मनोत्पत्तेस्त्वंधिधेयत्वेनविवक्षितंतन्नेयंसमारोप्त
मुपगतं।यथावातंरुपान्मदुरवेस्यभार्गवंराघवःस्वलितवीर्यमात्मनि।तंचसंहितमभोघसायकंव्याजहारहरस्तनुंसनिभः।अत्रशायकानुवादे
नाभोघत्वंविधेयंअभोघमास्कंगमितिनयुक्तःपाठः।यथावामध्येव्योम्नस्त्रिद्वांकोःशतमखविमुखः।स्वर्गसर्गेचकार।अत्रविश्वामित्रस्यतपःप्रा
बल्यप्रकर्षःप्रस्तुतःसचनस्यनिरुपक्रमस्यसतःशून्येव्योमनिस्वर्गसर्गसमर्थनेवप्रतिपादितोभवतीतिव्योमेनप्राधान्येनविवक्षितं।ननन्मध्यं

कामुकचित्तस्ययत्संदाननंबंधनं। प्राक्प्रयानमुत्काःतिप्रियत्वात्। तांतिरखेदं। अस्मानितिसप्रयप्रधानोवास्यातांरूपमात्रप्रधानोवातन्त्रनताव
दभिधेयप्रधानोअनुभ्युपगमात्। अर्थस्यासमन्वयात्। नाधिस्वरूपप्राधानोनित्यवमसरविशेषस्यहिरण्यकसिपोरभिधानानुकारः॥प्र
रूयानक्रियाकर्मभावेनाभिहितोभवतिद्विविधोहिशब्दानुकारःशब्दत्वार्थत्वभेदात्। तत्रेतिनाव्यवच्छेदशब्दःप्रसिद्धावत्रप्रार्थादवच्छेदाव
गतोआर्थः यथामहदपिपरदुःखंशीतलंसाम्यमाहुः। इहचायमार्थोनुकारइतिनानवच्छेदात्। कथलंयत्तस्याभिधानमनुकार्यतन्नानुकृतं
यच्चानुकृतंतत्तस्याभिधानमेवनभवतिलोकेहिहिरण्यकशिपुरितितस्याख्यानहिरण्यपूर्वकसिपुरिति। अतस्तस्यावाचकत्वं। इंद्रशब्दार्थ
श्चदेवराजशरीरसेवनचतत्तेननिष्पादितंपारमैश्वर्यंयैचधात्वर्थोव्युत्पत्तिनिमित्तमात्रंरूढिशब्दत्वात्। यथावाशुण्यंयदंतःकरणेनरक्षाःफलं
तिकल्पोपपदारत्नदेव। अत्रकल्परक्षाइतिवक्तव्येकल्पापपदत्वेनरक्षान्विशेष्यतद्वचनमवाचकं। यतोविशेषणमिदमभिधानस्वरूपवि
षयमेवावकल्पतेनाभिधेयाविषयंसोपपदनिरुपपदत्वयोरभिधानधर्मत्वान्नचतेनविशेषितेनकिंचित्प्रयोजनंअभिधानमात्राभिमतार्थ
सिद्धेः। अभिधेयविषयत्वेचतत्सिद्धिर्भवेत् किंतुनात्रयथोक्तविशेषणसंबंधःसंगच्छतेयत्रचसंगच्छतेनततोभिमतार्थसिद्धिरितिनेयार्थंवा। त

स्माद्रमन्नपाठःरूप्णंयदंतःकरणेननामतदेवकल्पद्रुमकाःफलंति। अस्मिंश्चपावेरूप्णास्यार्थस्यकल्पद्रूमाणांचावद्भावगतोगुणांतररक्षाः। ए
वंदशपूर्वरथंयमाख्ययेत्यादावपि। निःसपत्नइतिसपत्न्योस्तु रवीः। निषेधोविधेयइतिप्रसज्यविषयत्वादित्यर्थः। यदुक्तंअप्राधान्यंविधेर्यत्रप्रति
षेधेप्रधानता। प्रसज्यप्रतिषेधोसौक्रियया सहयत्रनञ्। एतदेवदृष्टांतेनाहयथानवजलधरइति। अत्रप्रतिषेधस्यप्राधान्यं। नञ्समासस्त्वनुपपन्न
स्तस्यहिपर्युदासएवविषयः तत्रैवविशेषणत्वात्। नञ्:स्याद्यंतेनोत्तरपदेनसंबंधोपपत्तेः। तदुक्तंप्रधानत्वंविधेर्यत्रप्रतिषेधे;प्रधानता पर्यु
दासःसविज्ञेयोयत्रोत्तरपदेननञ्। नचपर्युदासाश्रयणंयुक्तंअर्थस्यासंगतिप्रसंगात्। मुक्तत्वप्रतिषेधोह्यत्राभिमतोनामुक्तत्वविधिःनचासौ
प्रतीयते। गुणभूतमुक्तनिषेधस्यार्थांतरस्यैवमुक्तत्वसदृशस्यविधिप्रतीतेरित्याह। नत्वमुक्तानुवादेनेति। एतदेवदर्शयति। यथाऽनुगोपे
त्यादौअत्राःत्रस्ताद्यनूद्यगोपनादिविधेयंतस्मादस्यनञोविधेयतयाप्रधानस्यानूद्यतयाःप्रधानेनमुक्ताशब्देनसहनसमासइष्टइतिस्थि
तं। यदाहनञर्थस्यविधेयत्वेनिषेध्यस्यविपर्यये। समासेनेष्यतेर्थस्यविपर्यासप्रसंगतः। अश्राद्धभोजीत्यादौतुश्राद्धभोजीत्यनेनगमक
त्वाद्वासमासः। भवस्यभार्याभवानीतनोभवान्याःपतिरित्यत्रेभवंविहायान्यस्यापिपत्युःप्रतीतिः। यथाचैत्रभार्यायाःपतिरित्यत्रैऽपपतौप्रतीतिः

सापीत्यपिर्विस्मयेऽम्बिकाजनन्यपितनोमातृरमणइतिविरुद्धाबुद्धिः।सऽधेत्यमृतरूपाऽन्यर्थीति।अप्रयुक्तादिसमासगतंतथाशृंगारेदधिघृ
तकुशालसादयोहास्येनयविनयार्थवाचिनोरोदेदमक्षमासत्यशौचादयोवीरेव्याधिनालस्यादयोवीभत्सेचंदनादयोऽद्भुतेघृणावदर्थाः
शब्दास्त्याज्याः।अपास्येति।व्यक्तसंस्कारादिदोषत्रयंविहायवाक्येपिश्रुतिकदुप्रभृतयोदोषाः।अध्येयेति।भट्टिकाव्येदशारथवर्णनेऽतांसीदि
त्यंतर्भूतेनर्थःसकर्मकोन्यथाकर्मचिंत्यं।षड्दर्शनमिति।कामक्रोधलोभमदमात्सर्याहंकाररूपं।अत्रक्रियापदानिश्रुतिकदूनि।अप्रयुक्तंयथा
स्वराड्रिति।भावुकानांकुशलानांसंबधिनींपरंपरांयुष्मभ्यंददातु।श्लोकोयशः।शराहीतिशरस्मरश्लोतिपद्मार्थतयाप्रसिद्धत्वात्खट्वादिपर्या
यत्वंसिद्धत्वान्निहितार्थं।।कुविंदःपृथ्वीलाभयुक्तः।पटुकरोषिगुणग्रामान्सरितोनदीश्च।अत्रकुविंदपटयोरिवगुणाच्छादनशब्दास्ते
तुवायादिकमभिदधानाःस्तुत्यस्यतिरस्कारंव्यंजंति।प्राग्भेनिप्रकृष्टमभंकृष्णोमेघस्तद्वाजतेयोविष्णुस्तस्यधानमव्योमप्राच्य।अत्रपंच
शब्दाःपंचानामवाचकाःयथावाधिभजंतेनमेभूपमालभंतेनतेश्रियं।आवहंतिनतेदुःखंप्रस्मरंतिनमेप्रियं।अत्रविभजंतिर्विभागार्थः
सेवनेऽपिलभतिर्विनाशार्थोलाभेआवहंतिःकरोत्यर्थोधारणेप्रस्मरतिर्विस्मरणार्थःस्मरणेःवाचकः।कंपनासेनारागवशान्मलाच्च।धामंश्च

नुंप्रतिप्रतिकूलंवस्तुचरोचनंयस्याः।कामशास्त्रभाषयोपसर्पणंरतैन्यागमनंवास्यायनेप्रथमाध्यायेग्रहणंनेयोगाद्रतिसूत्रेमैथुनार्थःग्रहण
नशब्दः।पावकेनपवित्रेणजनेनाग्निनाचसहान्वयोयत्रपितृगृहे।सरालयेति।संग्रामेनिहताःस्वर्गंयांतीत्यद्भुतंतिस्वर्गास्तत्रचकारणंसराजा
संग्रामवार्तत्वात्।कंपनासेनाचलेनंमार्गणेषुयाच्ञासुच।भूमिभस्मच।तस्याधिमात्रेति।मृदूपायोमध्योपायोऽधिमात्रोपायइतित्रिधायोगीए
कैकश्चमृदुसंवेगः।मध्यसंवेगस्तीव्रसंवेगश्चेतिनवतत्राधिमात्रोपायानांतीव्रसंवेगानांआसन्नःसमाधिलाभःसमाधिफलंचस्यात्।संविपादयि
षयाचित्तवृत्तिनिरोधसाधनानुष्ठानंयोऽभ्यासःसदीर्घकालनैरंतर्यसत्कारासेवितोदृढभूमिः।दीर्घकालेनासेवितोनिश्छिद्रासेवितस्तपसाब्र
ह्मचर्येणविद्ययाश्रद्धयाबलेपादितसत्कारवान्दृढभूमिव्युत्थानसंस्कारेणद्रागित्येवानभिभूतविषयःयोगोपरमेपियस्यध्यानसंस्कारोनाभि
भूयतइत्यर्थःप्रियेमांसश्च।कामीचात्रप्रस्तुतस्यकामिनोधिकारणवतः।तीव्रसंवेगताद्युचःप्रियप्रमदाप्राप्तेःप्राक्तनदुश्चरादिसाधवतोनि
श्चलानुरागस्येत्यर्थः।वस्त्रेत्यादि।वस्त्रमंबरंवैदूर्यमणिः।चरणाःपादाःअंबरमणिपादेरित्यर्थः।क्षतंसत्वरजोभ्यांपरंतमोयस्यांसाक्षतसचरजः।परा
अचलाभूस्तत्पर्यायोनिःकंपावेदयेति।बोधयरविकिरणैर्भूमिहतनमाःरूना।खंजाग्रद्धीत्यर्थः।अपूर्वबंधेति।अपूर्वोबंधोव्यक्तत्वंनिर्यस्यक्लिष्टत्वमिति।

व्यवहितार्थप्रत्ययजनकत्वं।अविमृष्टविधेयांशत्वंवाक्येयथान्यत्कारोहीति।अत्रेदमर्थन्यक्कारयोरनुवाद्यविधेयभावोविवक्षितःसचरूप्यरूपणास्वभावइतिरूप्यविषयस्यानुवाद्यस्येदमर्थस्यप्रागुपादानंन्याय्यं।अयमेवन्यक्कारइत्कक्रेहिशब्दशक्तिमाहिम्नान्यक्कारस्यविधेयत्वंप्रतीयते।यथाइयंगेहेलक्ष्मीरियममृतवर्त्तिर्नयनयोरसावस्पर्शोवपुषिबहलश्चंदनरसः।अथकंठेबाहुःशिशिरमसृणोमौक्तिकसरःकिमस्यांनत्रेयोयदिपरमरह्यस्तुविरहइत्यादौप्रबोधनंप्रबोधितंतद्दृश्यतेयस्यचथास्थानेरित्यत्रापिस्थात्वमेवविधेयंतत्रेथंविशेषणतयोपन्यस्तंसद्वोणं।यदाहअनुवाद्यमनुक्त्वैवनविधेयमुदीरयेत्।नह्यलब्धास्पदंकिंचित्कुत्रचित्प्रतितिष्ठति।विधेयोदृश्यभावोमेरूप्यरूपकतात्मकः।नतत्रचविधेयोक्तिरूद्देश्यात्पूर्वमिष्यते।ननुअयमेवन्यक्कारनुस्थानेऽर्थेत्येवंविपर्ययेणात्रसंबंधःकरिष्यते।तस्यपुरुषाधीनत्वान्नथात्वनयथोक्तदोषावकाशःसह्यंनसर्वविषयोयंसंबंधस्यपुरुषाधीनत्वोपगमस्तस्यहिविशेषणविशेष्यभावरावविषयोवगंतव्योयत्रस्वसौंदर्यादेवतयोरन्योन्याक्षेपानविध्यनुवादभावः विध्यनुवादयोर्यथाश्रुतपदार्थसंबंधनिबंधनोऽर्थप्रतीतिरूक्तइतिपदार्थपौर्वापर्यनियमोवगंतव्यःततश्चयद्नूद्यतेतस्यादावुपादानमुपपन्नं।यत्तुविधीयतेतस्यपश्चादिति।रत्नेवारीमूपोभवतीत्यादौचतथैवदृष्टंतथाचद्विरादेजित्यत्रभगवतामहाभा

ष्यकारेणावस्थापितंयदुतालंमंगलद्योतनार्थमादोवद्दृश्यस्योपादानंक्षमणीयमन्यथाआदेजनुवादेनवद्दृसंज्ञाविधानात्यश्चादभिधानंकार्यस्यात्।यथादृद्रुणइत्यादौनथाप्रमाणमविसंवादिज्ञानमित्यत्रापियत्प्रमाणमितिलोकेप्रसिद्धंतद्विसंवादिज्ञानमेवेतिज्ञेयमितिनात्पर्यार्थः।काव्येपिएषैवशैलेशीयथाचत्कारयीनिवसनंमृगचर्मसव्यागेहंगुहाविपुलपत्रपुटाचटाश्च।मूलंदत्तंचकुसुमंचफलंचभोज्यंपुष्पस्यजातमटवीगृहमेधिनस्ते।नपुनरेवंयथाशय्याशाद्वलमासनंशुचिशिलासद्मद्रुमाणमधइत्यादि।शाद्वलाद्यनुवादेनशय्यादीनांविधेयत्वात्।अरालंबक्रं।अनुवाद्यमात्रप्रतीतिरूक्तिति।अनुवाद्यविषययोःक्रमेणैवप्रत्यायनायवक्तुमिष्टंनतुविधेयत्वप्रतीतिरूक्तितियदःप्रयोगोऽनुपपन्नः।यत्रहियत्तदोरेकतरनिर्देशेनोपक्रमस्तत्रतत्प्रत्यवमर्शिनातदितरेणोपसंहारोन्यायः।तयोरनुवाद्यविधेयार्थविषयत्वेनेष्टत्वात्।तयोश्चपरस्परापेक्षयासंबंधस्यनित्यत्वात्।अतएवाद्युत्तदोर्नित्यमभिसंबंधइतिसचायमनयोरुपक्रमोपसंहारक्रमोहिविधःशाब्दश्चार्थश्चेति।तत्रोभयोरुपादानेसतिशाब्दोयथा।यदुवाचननमिथ्यादृष्टंनजहारतत्।यथाचसदुर्मतिःश्रेयसियस्यनारदः।एकतरोपादानेसत्यार्थस्तदितरस्यार्थसामर्थ्येनाक्षेपात्।तत्रतदःकेवलस्योपादानेआर्यः।प्रक्रांतप्रसिद्धानुभूतविषयतयान्विधेयाह।तथाहिप्रक्रांतेति।सइ

इतिप्रक्रांतोराजा।सतिसर्वलोकप्रसिद्धा एतत्कंपिनीतिवत्सराजःस्वकांतांदैवयोगात्प्रदीपनकेद्ध्वांदृष्ट्वातदीयांदहनसमयावस्थांस्मरन्विल
पतितेइतिसातिशयविभ्रमैकास्पदेइत्यनुभवैकविषये।चंद्रमस्युदितेसतीतिशेषः।सा धुकृतंयन्मीलिते।नात्रतच्छब्दापेक्षातद्विषयस्यकर्मादेरर्थ
सामर्थ्यादेवाक्ष्यमाणत्वात्।येनामेति।नामशब्दोःक्षमायांयेकेचिद्ग्रंथेदेशेकालेवाअस्माकमवज्ञांकुर्वंतितेकिमपिस्वल्पंनकिंचिद्लोकोत्तरंवा
जानंतिनान्प्रतिनैषप्रकरणनिर्माणविषयोयत्नःतेषांलोकदर्शितात्।लोकोत्तरंयज्ञानंतीतिव्याख्यातं।तत्तेषामुपहासायकान्प्रतितर्हीत्याहउत्पश्यतेत्विति
सारेतरविभागज्ञउत्पश्यतेकश्चिदितिसंभाव्यते।एवंयत्तच्छब्दविचारंकृत्वायोसौसकगेतिप्रस्तुतेभावयन्नाहएवंचेति।असौत्रेकांशत्वमितियोसौसकार
गेत्यत्र।ननुयोसोइतियत्तच्छब्दानांनारोःइःशब्दःप्रकृतःएवमेतच्छब्दार्थमभिधारयतीत्याह।नचेति।नह्यसावित्यत्रतेसइतिप्रतीयते।यथाअ
सौमरुदितिमरुतास्वपित्राच।केशराणिसदाचकुरुवृक्षभ्रुताराधिपश्चंद्रःसग्रीवश्चमंडलंबिंबंराशूंचरामोरामभद्रोरामाश्रियश्च
तद्विप्रत्रेवेतियोविकल्पमित्यस्मिन्विचक्षतेवाक्यांतरगतत्वेनव्यवहितस्याभिन्नविभक्तिकस्येवाःएतदिदंशब्दस्यापादानंयुज्यातनंतत्रैवयत्रै
वयच्छब्दःअव्यवहितत्वेहिप्रत्यक्षतदितराकांक्षाभवत्येव।यथायेदतश्चंद्रांतर्जलदलवलीसंप्रकुरुतेतदाचष्टेइति।सोयंचटःश्यामइतिप्रसिद्ध

स्त्रयापुरस्तादुपयाचितोयइत्यादौ।यत्तदूर्जितमित्यत्रयच्छब्दानंतरस्यतदःप्रसिद्धेनोत्तरेणयदाभिसंबंधादार्थः।यदस्तुदेवेपीत्यनेनतदाप्रकांक्ष्य
मानविषयेणशाब्दःसंबंधः।एवंचयोसावित्यत्रयदःकेवलस्यैवप्रयोगःसकेनाभिसंबध्यतांततश्चादस्त्वमेवनविधेयत्वमितिस्थितं।प्रकारांतरेणा
चमष्टविधेयांशंवाक्यंदर्शयति।तथाकिंलोभेनेतिलक्ष्मणोक्तोनत्वनयोरितिआर्यानुजइतिनानकरुत्रमिति।अत्रषष्ठीसमासोपिनोपपद्यतेयतःसर्वे
षामेवनाघत्समासानांप्रायेणविशेषणविशेष्याभिधायिपदोपरचितशरीरत्वंनामसामान्यंलक्षणमाहुरित्यर्थांतमर्थमनुपपत्तेः।सचविशेष
णविशेष्यभावोहिधैवसंभवति।समानाधिकरणोव्यधिकरणश्चेति।तत्राद्यःकर्मधारयस्यविषयःयत्रतुद्वेबहूनिवापदान्यन्यस्यपदस्यार्थे
विशेषणभावंभजतेसाबहुव्रीहेःशरणिःतत्रैवयदासेरव्यायाःप्रतिषेधस्यचविशेषणभावस्तद्धितार्हगोर्नञ्समासस्यगोचरः।द्वितीयप्रकारः
कारकाणांसंबंधस्यचविशेषणभावस्तदीयोदाद्बहुविधःसमस्तपुरुषस्यपंथाःतत्रापियदाव्ययार्थस्यविशेष्यतास्यात्तदासावव्ययीभावस्यमार्गः।त
देवंसमासानांविशेषणविशेष्याभयांशसंस्पर्शित्वेपियदाविषणांशःस्वार्थयोत्कर्षाधानहारेणवाक्यार्थचमत्कारकारणतयाप्रधान्येनविवक्षितो
विधेयधुरामधिरोहंद्वितरस्तूद्यमानकस्मतयान्यभावमिवभजेततदासोनवस्तेर्विषयोभवितुमर्हतितस्यांहिसप्रधानेतरभावस्तयोरस्त

भियात्।विशेषणेक्त्यन्वयव्यतिरेकानुविधायिनीहिविशेषणानांविधेयतावगतिस्ततराचचेषांविशेष्येप्रमाणांतरसिद्धस्योत्कर्षापकर्षाधायिनो
शब्देगुणाभावेप्यार्थेप्राधान्यंविशेष्याणांचशब्देप्राधान्येप्यार्थेगुणभावोप्यनूद्यमानत्वात्।समासेचविभक्तिलोपान्नोत्कर्षापकर्षावगति
रितिननन्निबंधनारसाभिव्यक्तिरितिनदात्मनःकाव्यस्याविस्पष्टविधेयांशत्वंदोषः।तन्नैतद्विशेषणमेकमनेकंवास्तुनानयोर्विशेषःकश्चि
त्।तत्रकर्म्मधारयेयथाउक्तिषुंत्यारतांतेभरमुरगपतोपाणिनेकेनकृत्वा।धृत्वाचान्येनवासोविगलितकबरीभारमंसंवहंत्याः।भूयस्तत्कालकांति
र्द्विगुणितसुरतप्रीतिनसौरिणावःश्याममालिंग्यनीतंवपुरलसरुसद्दाहुलक्ष्म्याःपुनातु।अत्रविगलितकबरीभारत्वंमलसरुसद्दाहुत्वंचोस
वपुषोर्विशेषणेरनेरुद्दीपनविभावनापादनेनवाक्यार्थस्यकामपिकमनीयतामावहतइतिप्राधान्येनविवक्षितत्वान्नाभ्यांसहसमासेक
विनान्यथाभावंगमिते।एवंसमासांतरेष्वपिअविस्पष्टविधेयांशत्वंबहुव्रीहौयथा।यःस्थलीकृतपृथिव्याद्विराजोत्तापारवारिधिः।यश्चार्त्तपि
तवातापिःसमुनिःश्रेयसेस्तुवः।अत्रस्थलीकरणादिविधेयं।येनस्थलीकृतोविंध्यइत्यादितुयुक्तंयत्रपुनरेषमधानेतरभावोनविवक्षितःस्व
रूपमात्रप्रतिपत्तिफलश्चविशेषणविशेष्यभावस्तत्रसमासासमासयोःकामचारःयथास्तनयुगमस्तस्त्रानंसमीपपरिवर्त्तहृदयशोकाग्नेः

DR BHAU DAJI

चरंतिविमुक्ताहारंव्रतमिवभवतोरिपुस्त्रीणां।अत्रभवतइति।रिपुस्त्रीणामितिन्नरिपुस्त्रीणांस्तनयुगस्यचसंबधित्वेनयद्विशेषणंननतस्तेषांउत्कर्षयोगःक
श्चिद्विवक्षितोपितुतत्संबंधप्रतीतिमात्रंतच्चव्रतमिवभवदरिवधूस्तनहितयमित्यतःसमासोदपितुल्यमेवयथाचैवरिपुस्त्रीणामितिरिपुसंबंधमात्रप्रतीतिः।
स्त्रीणांविधेयत्वंचैतत्प्राधान्योपलक्षणमात्रिवारात्।ततश्चप्रधानाविमर्शोपिदोषः।यथास्नेहंसमापिबतिकज्जलमादधातिसर्वान्गुणान्हृतिपात्रमधः
करोति।योयंशब्दानुकरणसंचयसभृतात्मादीपःप्रकाशयतितत्तमसोमहत्।अत्रहिप्रकाशनक्रियायाएवप्राधान्यविवक्षानान्यासामिति।नासांतत्समर्शीर्षि
कयानिर्देशोदोषः।सहितत्रशब्दादिभिरेवबक्तुंन्याय्योनाख्यातेनयथाविभ्राणःशक्तिमाश्रुप्रशमितबलबत्तारकोजित्यगुर्वीमित्यादौ।यथावामनेवशब्ध
दृश्यानलोपिसंततततमस्तोमछिदापंडितःकाषायंदधदंबरंमुनिरिवक्षोणींपुननःपरं।कुर्वाणःकरविभ्रमैस्त्रिजगतोबोधंसमध्यासितःपोरस्त्याचल
वेदिकांदिनकरःक्लिस्नातुवःकल्मषं।सर्वासांपुनःप्राधान्यविवक्षायांनाख्यातवाच्यत्वंदोषः।यथासौधादुद्विजतेत्यजत्कपचनंहेष्टिप्राभामेंदवींद्वारा
म्नश्यतिचिन्नकेलिसदसोवेषेविषंमन्यतेआस्तेकेवलमंगिनीकिसलयप्रस्तारशय्यातलेसंकल्पोपनतत्वदाकृतिरसायत्तेनचित्तेनसायत्नैककर्तृका
नेकाप्राधान्येतरभाल्किया।तत्राख्यातेनवाच्याद्याशास्त्रांधेरितरापुनः।दृयंचसमासासमासचिंतारसप्रसादानुगुणप्रयोगावहितचेतसांसहृदयानामे

वोचितानान्येषांनेहिशब्दव्युत्पत्तिमात्रोपजनितात्मिमानदुर्विदग्धालक्षणमस्तीत्येवरसाभिव्यक्तिविघ्नभूतंवक्तव्यकरप्रायंप्रयुंजते।श्रितक्षमाइति
रुतोपशमाद्यैरुपनिताश्चत्रुरक्तलोकाःशोणिताधाराश्चशिवारुतगात्रीचविग्रहःकलिःशरीरंचगताशर्माणःगतप्रयोद्दियाश्चेतिविरुद्धमतिरु
न्। क्रियाफलाभावादितिनहिदृग्निदृष्टैकफलंलभतेद्यापिसाविरहिणीत्वात्। कीलनंतत्रैवस्थैर्यं। सोजन्यमान्यतयोर्जनिरुत्पत्तिः। पूयशब्दइति।
पदांशोजुगुप्सार्थः। प्रेतशब्दइतिअमंगलार्थत्वात्पदांशोऽस्त्रीत्वः। नेयार्थपदांशोयथाक्रिमुच्यतइति। जलध्यादीतिति। उत्तरपदपरिवर्तनेहिमेघएव
वाच्योनरसमुद्रः यदुक्तं। शब्दप्रवृत्तिहेतौसत्यप्यसमर्थमेवरूढिवशात्। योगिकमर्थविशेषेणपदंयथावारिधौजलभृत्। अप्रयुक्तादयइत्यादिश
ब्दाःवाचकसंदिग्धेनेयार्थाः। भेदप्रदर्शनेनेतिमल्लिकाशायेतिशेषः॥६०॥अर्थांतरेद्वितीयस्मिन्नर्थेएकोवाचकःशब्दःप्रथमार्थस्यमन्त्रसत
तथा। अपदस्थंपदंसमासश्चयत्रप्रसिद्धिहेतुमितिद्युतमितिपाठांतरं। देशःसोयमितियस्मिन्देशेपरशुरामपितारेहयेनकेशेषुधृतस्तत्रैवाभ्यशा
मास्यपितरंद्रोणंपांडवैःकेशधृतंछेदमाह। निर्शुभोनमनं। अपविद्धोमुक्तः। चतुर्थपादइत्यस्यैवचरमस्य। तथैवेति। अविकटवर्ण्यत्वेन। उपहते
ति। यदाहकुन्तकः। अत्रालुप्तविसर्गांतैःपदैःप्रोक्तैःपरस्परंहृद्यैःसंयोगपूर्वैश्चलावण्यमतिरिच्यते। संधिःस्वराणांसमवायःसंहिताकार्येणद्रव

द्रव्याणामिवैकीभावः। विवक्षितश्चसंधिर्भवतीतिवचनात्तानिइंदोरित्यादौसकृदपिविसंधित्वंदोषः। सतिचद्वितीयपदेविसंधित्वंस्यादितिद्वितीयं
यंपदंविसंधीत्यत्रद्वितीयपदस्याप्यादिपदंविनाविसंधित्वंदुर्घटमित्यादिपदमप्यर्थाद्विसंधीत्यतएवायंवाक्यदोषः। जनिरुचितार्थवर्तनरूपेइत्य
र्थः। संहितेकपदवत्यादेस्वदंतिवज्जमितिकाव्यसमयइत्याहसंहितामिति। इंद्रेहिवचनेप्रगृह्यमितिहिवचनोतानोप्रगृह्यसंज्ञोक्तातेषांप्रकृति
स्थत्वविधानेनिरंतरंयत्करणंधीदोबलेइत्यादौतदपिदोषः। सकृत्तुनदोषइत्याहप्रगृह्यादीति। अश्लीलत्वंयथावेगादुद्वीतिअत्रकस्मीरेषुदुद्वी
तण्डुचिन्तुमित्यश्लीलशब्दास्तृतीयादिसंधौवरांगमेद्वयोनिमणिवाचकाः। तथाचकाशोपनसप्रायैःपुरीषंडमहाद्रुमैःअनर्होपपुरीषमहाद्रुमशब्दाव्रीडाजु
गुप्साःमंगलार्थस्मारकाः। कष्टंयथाऽर्थसाविति। ऊर्वीअप्रमाणाश्चार्बबस्थितिःसप्रसराअत्रसंवेतेनऋजुप्रांजलंअमृतमिति। कश्चित्प्रियायाअधर
स्यस्वादिष्टतामभिधित्सुःस्वादुतयाप्रसिद्धास्तावदर्थानभ्यनुजानाति। रसवत्स्वादुनान्यथारसवंसेवेत्यर्थः। अथकिंनात्रकश्चिद्विप्रतिपद्यतइत्यर्थः। प्रस
न्नरसंप्राप्तपरिपाकं। एकमनुज्ञायसकृदपीत्यादिनाविवक्षितमाह। मध्यस्थःसन्नपक्षपतितोभूत्वारसांतरविज्ञानस्तस्यैवोभयास्वादकत्वात्। विचा
रेऽधिकारः। यदाहान्यदिति। अथस्वरसंधिरुक्तेपिनाम्नोऽन्यशब्दस्यभेदेयतिभ्रष्टत्वप्रतीतेरश्रव्यत्वं। हरिण्यांहिरुक्तेषद्भुतःसप्तभिर्यतिः। जंपरी

 ति।आनंदवर्द्धनकृतपंचबाणलीलाकथायामियंगाथा।नीर्यतेशक्यते।यस्येतिकामस्य।एषकेवलंप्रतिपक्षैब्रह्मचारिभिः।सकारणकारावित्यश्रव्यो
बंधश्रोथित्स्यात्।हारित्यप्राप्तगुरुभावोंतलघुः।पुष्पिताग्रायांहिस्थंदसिविषमपादेत्योगणः।कन्येतिकुमारीत्यद्ययावदनयाएनंविमुच्यनकश्चि
दन्योविहितइत्यर्थः।वरुणाण्येपीतिण्यकारस्यमहाप्राणत्वाःदंत्यस्यापिमहाप्राणत्वमित्यर्थः।मुग्धविदग्धसभगयोरंतर्मध्येरत्नेतिसंबोधनं।हास्य
रसेति।करुणरसाननुगुणं।इत्थमितिचेन्निनोक्तंततोविरउस्यास्माभिःश्रुतमनुचितंवैशमनिभृतंगुरुश्चेश्रंखिन्नेमयिभजतिखेदंनकुरुषितियुक्तः
पाठः।अनिरुद्धाननिषिद्धासमन्वितोक्तिमुक्तिर्यस्यप्रक्रमभंगमिति।पूर्वार्द्धेकृतपदंनास्तिद्वितीयेर्द्धेस्तीति।नाडीजंघोनिजघेकृतनदुपकृतिर्यत्कृतेगो
तमेन।अत्रनछोधिकः।नच्छद्मंतरेणाप्यपकारस्यतद्विषयतानगतेः।नथादरुरुकंदलभागभूमिःसरलवांबुदंबरं।वाप्यःफुल्लांबुजमुजोज्ज्ञा
नाद्दृष्टिविषंमम।अत्रभजिःसहशब्दोयुजिश्चार्थाधिकाःप्रदेकंपदंद्विःप्रयुज्यतेनत्कथितंदोषः।नैकंपदंद्विःप्रयोज्यमितिसमयः।लाटानुप्रा
सादौत्तगुणाएवेतिवक्ष्यते।कः कः कृतेति।घुरीवाद्यभांडविशेषः।।घुर्घुरायितानासौघुरीचनदुन्घोरः।अत्रक्रमात्क्रममनुप्रासोघनयितव्यः
यथाचप्रथमपादेआरोहस्तथानद्वितीयपादादिधिति।कैंकारइति।अत्रप्रेमतनोनुबद्धतिवाक्येसमासेनचवयइत्यादिपुच्छायंपुनरप्यानं

नचमस्करोति।मसृणेति।अत्रयद्भूःसदर्भातन्मसृणचरणपतंगम्यंतांयच्चधर्मः कठोरः तन्मूर्द्धनरुजांचलं कुर्विनिपूर्वोर्द्धेयुक्तस्तच्छब्दोद्वितीयेर्द्धेप्रवि
ष्टः।अत्रगुणानामिति।अप्रधानानांगुणानांचसमत्वमेवप्रधानानुयायित्वादित्येवंरूपोन्यायोगुणानांचपरार्थत्वादित्यादिसूत्रेणजैमिनिनायउक्तस्तदनु
सारेणात्रनेरितिविधेयतयाप्राधान्येनयत्क्षपाचारिभिरितिप्रत्याययितव्यंनत्परत्वेनयच्छब्दनिर्देश्यानामर्थानामनुवाद्यत्वादेवगुणभूतानांनान्योन्य
मन्वयःप्रधानानुयायित्वेनसमत्वात्।अतःक्षपाचारिणामितिविशेष्याभिधायिपदोपादानेयेषांयेषामितियच्छब्दृत्येसामानाधिकरण्यंद्रवतिविशे
ष्यस्यप्रतीतिः।यैरित्यत्रतुसामानाधिकरण्यंनयत्क्षपाचारिभिरितिविशेष्याभिधायिपदंतद्विनाकथंविशेष्यंगम्यतेविभक्तिपरिणामश्चश्रुत्रीयो
न्यायःकाव्येषुनयुक्तइत्याह।यैरित्यनेन।युज्यतइति।यदिक्षपाचारिणामित्यस्यस्थानेक्षपाचारिभिरितिपठ्यतेतदात्रयोपियच्छब्दार्थाःसमश्नीर्षि
कंयाधावित्याप्रधानेननेःक्षपाचारिभिरित्यनेनप्रतिस्वमंजस्येनेवसंबंधमनुभवंतीत्यर्थः।त्वमेवमिति।एवंपरिदृश्यमानंसर्वानिशायिसौंदर्यय
स्याःसचरुचिरतायाः।सौंदर्यस्यपरिच्छिन्नःसीमानमुत्कर्षंयुनयोर्मिथुनमितिप्राक्तनेनहेतुनासंवदति।अतःसंवादाच्छिष्टंयदन्योन्यंस्करतस्करयानुग
नंतच्चेत्यात्रदानींगुणितयाजितमनुरूपसंयोजनयासर्वोत्कर्षेणवर्त्तमित्यर्थः।नचात्रन्यूनपदत्वंदोषोयच्छब्दाभावेपीष्टसंबंधस्याभावादित्यभव

मत्तयोगोदोषः।अत्राकर्ण्यनेति। यद्याकर्ण्यमेतिक्रियायाः कोदंडादयः कर्मत्वेनविवक्ष्यंतेतदातेभ्योद्वितीयास्यादितिभावः।वाक्यार्थस्येति।यदिकोदंडादि
वाक्यार्थः कर्मत्वेनविवक्ष्यतेनदाप्रथमातनास्यात्।तथाअवैमित्यादौअवैमेतिक्रियायाअन्यतनवाक्यार्थः कर्मत्वेन
विवक्षितोपिप्रथमोनइतिद्वितीयंदूषणंनवयेनयेनेत्यनयोर्यच्छब्दयोः कोदंडादिरर्थोयेनतद्वारेणतद्विशक्तिः स्यात्।नापियेनयेनेत्यादेर्विशेषणंको
दंडादिर्येनयच्छब्दसमन्वयः कोदंडादिभिः स्यात्।नचकेनेकेनेत्यादिः प्रश्नोक्तियेनकोदंडेनेत्यादेस्तृतीयास्यात्।संवैरितिऋत्विगादिभिःतेनाश्व
रइत्याधारतयानिर्देष्टुंयोग्यः।यथावाहदतरनिविष्टमुष्टेः कोशनिषण्णस्यसहजमलिनस्यकृपणस्यकृपाणस्यचकेवलमाकारतोभेदः।अत्रकृपण
कृपाणयोराकारमात्रकृतोव्यतिरेकउक्तः।सचायुक्तःद्विधोह्याकारार्थःसन्निवेशलक्षणोअक्षरविशेषलक्षणश्च।तत्राद्यस्तावत्परस्परपरिहार
स्थितिमतोरर्थयोःसिद्धएवेत्यनुपादेयोनचमत्करोति।द्वितीयस्त्वक्षरविशेषकृतस्यानेदाभेदव्यवहारस्यशक्तेकविषयत्वादर्थयोर्नसंभवत्येव।इह
तुयुक्तएवासौ।अक्षराणामकारोहमितियःस्वयमभ्यधात्।सोपित्वयामुनास्वाम्याकारेणलघूकृतः।तेनोक्षरविशेषात्माकाराभेदलक्षणस्यश
ब्दधर्मस्यार्थविशेषणभावेनपरस्परमसंबं दोषः।विधिर्वाच्यइति।अपह्नुतिलक्षणोविधिःषष्ठांतनिर्देशसतिनयुक्तोयतस्तथापीतिभिन्नंचा

वाक्यगतत्वेनेवोपपद्यते।एषोहमिति। उषानाम्नीशिवयोःस्कंदासाचपुराणवृत्तांतेनबाणासुरसुतेतिलोकेरूढासाचानिरुद्धेनकामसुतेनसहस्वप्नल
ब्धंवरंप्राप्स्यतीतिगौर्यादत्तेनप्रसादेनपरिणायिता।सचगौरीमुखविनिर्गतोवरः साधिष्ठायकत्वादेवतारूपोन्येषांपुरस्थात्मानंप्रशंसन्निदमाह।अ
निरुद्धेनसहयाघटनानयाःधिगतंआभिरूप्यलक्ष्म्याःसुरूपतायाःफलंमया।वाच्यमिति।यतोत्रापिशब्दंविनाविवक्षितार्थस्यनप्रतीतिः।क्वचिच्च
दुष्टार्थप्रतीतिःस्याद्यथासंपदोजलतरंगविलोलयौवनंत्रिचतुराणिदिनानि।द्वारदाभ्रमिवचंचलमायुःकिंधनैःपरहितानिकुरुध्वं।अत्रधनशब्दःने
तरंकार्यशब्दानुक्तेः।धनैःकिमितिपरहितानिकुरुध्वमाकार्क्षेतिदुष्टोर्थः प्रतीयते।यथाबानवजलधरःसंनद्धोयमित्यादौअत्रभीतोनिवृत्तायां
तद्विषयभूतयोःस्करधनुर्धारासारयोरिवविद्यमानोपीदमापरामर्शोवाच्यः।तथाकमलमनंभसिकमलेचकुवलयेइत्यादौ।अत्रद्वितीयःकमलार्थः
सर्वनामवाच्यः।तेनतस्मिंश्चकुवलयेइतियुक्तं।केचित्तुधर्मिधर्मोभयात्मनोवस्तुनःप्रतिपत्तयेपुनःसएवशब्दस्तत्पर्यायःसर्वनामवाचश्चेवाच्यम
पिमत्रनोक्तं।तत्राप्यनभिहितवाच्यत्वमिदुर्यथाह्ययंगतंसंप्रतिशोचनीयतांसमागमप्रार्थनयाकपालिनः।अत्रकपालिशब्दोधर्मिधर्मोभयार्थवृत्तिः
संज्ञिमात्रंयाप्रत्याययेत्कपालसंबंधकृतंवागर्हितत्वमुभयमपिवेतित्रयःपक्षाः।तत्राद्यपक्षेविशेषप्रतिपत्तयेकपालिग्रहणमपरमपिकर्तव्यंयेना

का०श०टी० स्यगर्हितत्वंप्रतीयेतद्द्वितीयपक्षेतस्याश्रयप्रतिपत्तयेतेनैवतत्पर्यायेणसर्वनाम्नावाविशेषमवश्यमुपादेयंभवतियेनतस्यविवक्षितार्थसिद्धावार्थोहेतुभा
वोऽवकल्पेतनचैषामेकमप्यत्रोक्तमितिदोषास्तनद्वयंगतंसंप्रतितस्यशोच्यतामितियुक्तं।वयंतुब्रूमोनहिशब्दस्याभिधैवव्यापारोयेनैकस्मिन्नवार्थे
उपक्षीणत्वान्नस्यशब्दांतरमर्थांतरार्थंप्रयुज्येतनदावस्तुनिबंधनंवाकिंचित्परिकल्प्येतकिंतुव्यापारांतरमपिव्यंजकत्वलक्षणमित्येकस्मादेव
शब्दाद्वाच्येनसहैवव्यंग्यस्यापिप्रतीतिस्तथाहिपरमेश्वरवाचकशब्दसहस्रसंभवेपिकपालिनइतिनद्वाचकतयाप्रयुक्तबीभत्सरसालंबनविभाव
तासूच्यमानगुप्तास्पदत्वंध्वनति।अननिहितवाच्यत्वंचोपलक्षणंतेनवाच्यवचनमपिदोषः।यथाद्वयंगोहेलक्ष्मीरियममृतवर्त्तिर्नयनयोरसाव
स्याःस्पर्शोवपुषिबहलश्चंदनरसःअयंकंठेबाहुःशिशिरमसृणोमौक्तिकसरःकिमस्यानप्रेयोयदिपरमसह्यस्तुविरहः।अयत्नसाक्षात्सीतायावर्ण
नंतद्वाच्यमेवतत्संबंधिनांस्पर्शादीनामेवेहरस्याणामर्थानांविरहव्यतिरेकेणांगिभावेनोपयोगात्तत्तस्याएव।विरहस्यतत्संबंधित्वेप्यसत्त्वा
भिमानादितिसीतावर्णनंदोषः।मुखंपूर्णश्चंद्रस्तनुरमृतवर्त्तिनयनयोरितित्वाद्यःपादोयुक्तः।स्त्रजंनकाचिदितिनिर्देशोकापीतिनप्रतीयतेकिंतु
सर्वापीतिप्रतीतिस्तत्तोनञउत्तरवर्त्तिनोकिमशब्देनयोगास्याज्यः।श्लथजटायांस्रंसोलंबनंयस्यचंप्रखंडस्यतेनकपोलमध्येप्रतिबिंबकल्पनेन

गायपर्यवस्यति।सचप्रकृतिप्रत्ययसर्वनामपर्यायादिविषयत्वादनंतरप्रकारस्तत्रप्रकृतेर्यथानाथेति।तेहिमाल्येतिअत्रश्लिनंप्रक्रांतमिदमापरा
मृश्यतेनेवतत्परामर्शःकर्तुंयुक्तोननदानयोर्देवदत्तयज्ञदत्तयोरिवभिन्नार्थत्वान्नचासौकृतइत्याहात्रसर्वनामइति।पर्यायस्येति।पुत्रापत्यशब्दौ
पर्यायत्वात्प्रक्रमभेदविषयौअत्रोपसर्गस्येति।पूर्वंव्युपसर्गोपयदस्ततआग्नःप्रक्रमः।यथावाउदन्वच्छिन्नाभूःसचनिधिरपांयोजनशतं।अत्र
पर्यायस्यामिताभूःपत्यापांसचपतिरपांयोजनशतमितितुयुक्तं।एवंचछिद्रिक्रियाकर्तुरुदन्वंतउक्तनयेनविधेयतयाप्राधान्यात्सामासानुपप
त्तिदोषःपरिहृतः।कंपमापुरितिएवंरूपेसतित्यादेर्भग्नप्रक्रमदोषःपरिहृतः।अकलितेतिभार्गवंदृष्ट्वारामश्चिंतयति।अत्राकलितेत्याद्युक्ता
नुसारेणपूर्वंचादोपसंग्रहणायेतियुक्तं।यथावातवकुरुमशरत्वंशीतरश्मित्वमिंदोर्दृष्टमिदमथार्थदृश्यतेमद्विधेषु।विसृजतिहिमगर्भैर्व
ह्निमिंदुर्मयूखैस्त्वमपिकुरुमबाणान्वज्रसारीकरोषि।अत्रापिक्रमस्य।एवमन्यत्रापीति।कालविशेषप्रक्रमभेदोयथासस्नुःपयःपुपुरनेनिजुरं
वराणिजक्षुर्विसंधृतविकासिबिसप्रसूनाः।सैन्याःश्रियामनुपभोगनिरर्थकत्वमिथ्याप्रवादमसृजन्ननन्नगानां।अत्रयःस्नानादौकालविशेषः
प्रक्रांतःसनेजनेउपेक्षितः।मदापरोक्षे।लोकविज्ञातेप्रयोक्तुर्दर्शनयोग्यत्वात्परोक्षस्याधिवक्षायोह्यस्तनीयथाअजयज्जर्होहूणानिति।तथात्रिव

त्यादेश्चविकल्पमस्यदधुःप्रसूनमितितुयुक्तं।अस्मिंश्चपाठेविसशब्दस्यपौनरुक्त्यदोषोपिपरिहृतःसर्वनामपरामर्शस्यहिविषयोधिसार्थोनस्वशब्दस्य
यथाचसमतयावरुरुक्षुर्विसर्जनेर्नियमनाद्सतांचनराधिपः।अनुययौयमपुण्यजनेश्वरोसवरुणावरुणाग्रसरंरुचा।अत्रानुयातिक्रियाकर्मभावो
वरुणस्यार्थःप्रक्रांतइतिहेतुरप्यस्यनादरएवोपादातुंयुक्तोयत्वसन्नियमनलक्षणःशाद्धोहेतुरस्यान्येषामिवोर्थन्नःसाग्नःप्रक्रमः।तस्यापिरसाग्रं
गपर्यवसायित्वात्।तेननियमयन्नसतःसनराधिपइतियुक्तं।एवंचविभक्तिप्रक्रमभेदःश्वशब्दश्वभिरस्तसमुच्चयभावःप्रक्रमभेददुष्टश्वपरिहृतोभ
वति।यथाचचारुतावपुरभूषयदासितामनूननवयौवनयोगः।तेपुनर्मकरकेतनलक्ष्मीस्तांमहोदयितसंगमभूषः।अत्रभूरवलाक्रमेणकर्तुःकर्म
भावःकर्त्रंतरंचयथाप्रक्रांतंनतथानिर्वूढं।दीपकालंकारस्यचकाव्यशोभाकारित्वेनोपनिबद्धस्यानिर्वाहाङ्गेनप्रक्रमत्वंदयितसंगमशब्दस्यच
प्राधान्येनाभिमतरयसमासेगुणीभूतत्वाद्विभक्तिविधेयांशत्वं।तमपिवरुरुक्षुसंगइतितुयुक्तं॥इयमिति।संप्रतिहृद्यंचेत्यतिरम्यंयत्किंचूपूर्वमे
कारेणदु[illegible]र्व्यसनदूषितत्वेनशोच्याजातासंप्रतिपुनस्तुयातस्याःसाहायकमिवारब्धमित्यवहस्यतेप्रार्थनाशब्दोपिरामायतःकाकतालीय
न्यायेनतत्समागमःकदाचिन्नवाच्यतावहःप्रार्थनापुनरत्यंतंकलंककारिणी।साचत्वंचेतिहृद्योरप्यनुभूयमानपरस्परस्पर्द्धिलावण्यातिशयप्र

DR BHAU DAJI MEMORIAL LIBRARY

का॰श॰टी॰ तिपादनपरत्वेनोपात्तं। कलावतः कांतिमतीतिचमनुष्यत्वयेनद्वयोरपिप्रशस्यताप्रतीयते। सेतिसर्वप्रसिद्धा। त्वंशब्दादितिसमुच्चयद्योतकोहि
चकारः समुच्चीयमानार्थादनंतरमेवप्रयोज्यइतिक्रमः। अत्रपदस्यास्थाननिवेशित्वेपिक्रमाभावोशिष्ट्यंविवक्षितमितिक्रमपदस्थपदादस्यभेदः
। यथाचउद्यन्नाजयिनिकामिनीमुखेनेनसाहसमनुष्ठितंपुनः। अत्रहिपुनःशब्दस्तेनेत्यनोनंतरंप्रयोज्यःपुनःशब्दोहिव्यतिरिच्यमानार्थानंत
योपेक्षप्रयोगमर्हतीतिक्रमः। इतिश्रीनियोगादिति। तदुक्तं। उक्तिस्वरूपाधच्छेदकरोयत्नेतिरिष्यते। ननत्रतस्मात्प्राक्किंचिदुक्तेरन्यत्पद
वदेत्। इतिनैवेतरेषामप्यव्ययानांगतिः समाहतेयेस्थमेवमादीनांतज्ज्ञातीयार्थयोगिनां। यतस्तेचादयइवश्रूयंतेयदनंतरं। तदर्थमेवावच्छिद्य
रासमंजस्यमन्यथा। यथाचार्तार्थेनदीयेगजसेतुबंधात्प्रतीपगामुत्तरतोस्यगंगां। अत्रपरामर्शनीयमर्थमनुक्त्वेवयस्तस्यसर्वनामपूरामर्श
सोःक्रमः तस्यहिप्रक्रांतोर्थोविषयइष्टेनप्रक्रंस्यमानःस्मृतिपरामर्शात्तत्स्मृतेश्चानुभूतएवार्थोविषयीनानुभविष्यमाणः। अत्रचप्रती
तिमात्रमनुभवोनेंद्रियविषयभावः नचगंगाशब्दार्थः प्रतीतपूर्वोयस्तदापरामृश्येतेतिपरामर्शस्यात्रमोदोषः। इदमात्वनुपक्रांतस्यापिबुद्धे
र्वाध्यवसितस्यपरामर्शोभवतियथाइदंकविभ्यःपूर्वेभ्यइति। अस्मिन्रामायणेकवयः। वेदपिइदमहंरक्षसोग्रीवाअपिशंतामीतियत्रूद्देशि

नामनूद्देशिनांचक्रमभंगोःक्रमत्वंयथाकीर्तिप्रतापोभवतःसूर्याचंद्रमसोःसमाविति। अत्रपदरचनाविपरीतेतिभग्नप्रक्रमलक्षणोवाक्यदोषः। निशा
चरीअभिसारिकापि। गंधवदितिनिंदाप्रशंसयोर्मनुपूर्वंदनोक्षितेत्यत्रकुंकुमेतिमोल्लःपाठः। जीवितेशोयमोभर्त्तापि। अत्रप्रकृतइतिविभक्तरसे
॥७॥ त्रयस्त्रिंशतंवाक्यदोषानुक्त्वात्रयोविंशतिमर्थदोषानाह। अर्थोःपुष्टइति। प्रकृतानुपयोगादपुष्टार्थत्वं। यत्तूपात्तोपिस्वरूपमात्रप्रतिपाद
कत्वान्नकिंचित्साधयंतीति। अस्यसंबद्धश्यतथांश्चेतिरुद्रटोक्तेदोषोनापुष्टादस्माद्भिन्नाधित्याशयेनाहनत्वसंगतादिति। अनेनैवंविधानामर्थानामसंग
तत्वंछंदःपूरणमात्रत्वंवामन्यमानेनभट्टरुद्रटेनदोषस्यास्ययदसंबद्धइतिनहानितिचनामरूपंतन्निराकरोति। कष्टागम्यत्वात्कष्टार्थत्वंयथास
देति। कविरुचिनामितिप्रतिभारूपाणांप्रमाणां। सुकुमारेतियत्कुत्सकः। संतितत्रत्रयोमार्गाःकविप्रस्थानहेतवः। सुकुमारोविचित्रश्चमध्यमश्चोपपत्तिमा
कः। गंभीरकाव्यपरिचिताइतिमहाकाव्येसर्गबंधलक्षणेपरिचयमागताः कथमभिनेयकाव्यवत्। प्रसादयेतु। तथायासामितिद्वितीयोर्थः। ननुगु
णविपर्ययात्मनोदोषाइत्यनेनसामर्थ्यात्कष्टत्वदोषागमःसिद्धः किंदोषाधिकारेनदुक्त्वेतिसत्यंसौकर्यायनस्वपंचः। एवमन्यत्रापिसामर्थ्यावग
म्येनिर्द्दिष्टेअयमेवपरिहारोवाच्यः। पूर्वापरव्याघातोव्याहतत्वंयथाजगतीति। माधवस्यमालतींप्रतीयमुक्तिः। इंदुकलादयइत्यादिशब्दाच्चंद्रिकाप्यव

करप्रायायंवक्तारंप्रतिसराचक्ष्यिश्च्वेद्विकात्वमुत्कर्षार्थमारोपयतीतिपूर्वोक्तिश्च्वेद्विकोत्कर्षोक्तयाव्याहता। यथाबाल्मृगाक्षिनेत्रतवानुमेमे।तथाज
हिशत्रुकुलंकुलस्त्रंजयविश्वंभराभिमो।नचतेकोपिविद्वेष्टासर्वभूतानुकंपिनः।अत्रशत्रुवधोविद्वेष्यभावेनव्याहतः।किरीटीतिनेणीसंहारेःश्चश्वा
मार्जुनार्जुनेत्यक्त्वाटत्तेचभवद्भिरित्यक्त्वापुनरपिकिरीटिशब्दमुक्तवानित्यर्थपौनरुक्त्यं।तच्चार्थमेकमेवोपगंतुंयुक्तंनशब्दांतरस्यार्थभेदेसत्य
दुष्टत्वात्। यदुक्तं।तच्चनशब्दपुनरुक्तंपृथग्वाच्यमर्थपुनरुक्तेनैवगतत्वात्। नत्वर्थभेदेशब्दसाम्येकश्चिद्दोषः।यथाहसतिहसतिस्वामिन्युच्चैः
रुदत्यपिरोहतीत्यादौपौनरुक्त्यंचप्रकृतिप्रत्ययोभयपदवाक्यविषयत्वादनेकंयथाऽभ्रश्चीयसंहतिभिरुद्धतमुद्धुराणिः।अत्रसमूहार्था
याःप्रकृतेःसंहतेश्चार्थपौनरुक्त्यं।आगाभिनीजगद्हिरिजनतास्तरुणांउन्नसमूहार्थामाःप्रकृतेर्बहुवचनस्यचप्रत्ययस्ययथाविसकिसरुय
छेदपाथेयवंतः।त्वगुत्तरासंगवतीमधीतिनीमितिचमत्वर्थीयस्य।बहुव्रीहिसमासाश्रयेणैवतदर्थावगतिसिद्धेःयदाकुःकर्मधारयमत्व
र्थीयाश्चांबहुव्रीहिर्लुप्तात्प्रकृतस्य।तथाचासोजांघवपरुषवानीति।तदीयमातंगेति।येनाकुंभनिमग्नजन्यकरिणामितिऽत्रतद्धितप्रत्ययस्य
षष्ठीसमासाश्रयेणैवतदर्थावगतेः।अथभूतानिचार्त्तघशब्देभ्यस्तत्रतत्रसुः।अत्रत्वपत्यार्थेनद्धितेनेदमर्थेरतिनाधिक्यं।यत्रचविशेषणाद्विशेष्यमा

त्रप्रतीतिस्तत्रतदुक्तेःपौनरुक्त्यंयथापायात्सशीतकरणाभरणोभवोवः।अत्रभवशब्दस्ययथावाचकासतंचारुचमूरुचर्मणाकुथेंननागेंद्रमिवेंद्र
वाहनं।अत्रनागेंद्रेंद्रवाहनशब्दयोरेकतरस्य यत्रतुनद्विर्दोषप्रतिपत्तिर्नतत्रपौनरुक्त्यंयथातवप्रसादाकुरुकमायुधोपिसहायमेकंमधुमेवरु
ध्या।कुर्योहरस्यापिपिनाकपाणेः।अत्रहरशब्दस्य अथयथातवप्रसादाकुरुकमायुधोपीत्यत्रविशेष्योपादानमंतरेणाप्रकृतयार्थप्रतिपत्तिस्तद्दन्नापिभवि
ष्यतितदयुक्तंसत्तव्यक्तमपुरुषेणेवास्मदर्थस्यविशेष्यस्यप्रतिपादितत्वात्तन्नदनुपादानासिद्धेः।यदाहविशेषणवशाद्धिछेविशिष्टंयत्रसंज्ञिनांयु
क्तातत्रविशेष्योक्तिरन्यथापौनरुक्त्यमुक्तं।यथावावर्णैःकतिपयैरेवगथितस्यस्वरैरिवअनंतावाङ्मयस्याहोगेयस्येवविचित्रता।अत्रहितीयद्वया
द्दोधिकःतथाशिशिरमासमपास्यगुणोस्यनःकइवशीतहरस्यकुचोष्मणः।इतिधियास्तरुषःपरिरेभिरेघनमतोनमतोनुमतान्प्रियाः।अत्रधी
शब्दोःतदितिबहुत्वार्थःशब्दःपुनरुक्तोहेत्वर्थेनेतिनैवतदर्थस्यैक्यत्वात् यथाअभ्येतिविद्रुतमनुद्रवतान्यमश्वमिति।तेनद्रुतियतोस्तरुषःद्रुतियुक्तो।अ
त्रचकुचोष्मणःस्तुर्हरणक्रियातदपेक्षमपास्तनस्यपौर्वकाल्यमेवलक्षयत्यतयैवसोकुंभरुपाधिभावंगतेतिभिन्नकर्तृत्वभ्रमः।यथाविपच्य
घटोभवतीत्यत्रघटनक्रियापेक्षंविपचनस्यपौर्वकाल्यंनतुघटनक्रियापेक्षंयथाःधिक्षित्यपाचकोभवतीत्यादौपाकाद्यपेक्षमधिश्रयणादेर्नभवत

क्रियापेक्षंसाहिनावश्यंप्रयुज्यतेप्रतीयतेनुपदार्थानांसत्ताअव्यभिचारात्।ननुतावतातदपेक्षंनदिप्तिमंतव्यंतस्यावहिरंगत्वात्।अर्थस्यासंगतिप्रसंगा
च्च।प्रयुज्यमानक्रियापेक्षमेवपौर्वकालंक्तोविषयोनप्रतीयमानक्रियापेक्षंअन्यथाश्रुत्वापिनामवधिरोदृष्ट्वाप्यंधोजडोविदित्वापियोदेशाकाल
कार्यव्यपेक्षयापेहितःसपुमानित्यादिप्रयोगजातमनुपपन्नंस्यात्।श्रवणादीनांतत्पूर्वकालत्वाभावात्।श्रुत्यादिशक्तिविरहलक्षणाधियादि
प्रयुक्तक्रियापेक्षमेवश्रवणादीनांपौर्वकालंकेचित्त्वपास्येत्ययत्नवंतप्रतिरूपकोनिपातइत्याहुः।तथानिरीक्ष्यसंरंभनिरस्तधैर्यैराधेयमा
राधित्तजामदग्न्यं।असंस्तुतेषुप्रसभंभयेषुजायेतमृत्योरपिपक्षपातः।अथनिरीक्षणक्रियाकर्तुर्मृत्योभयपक्षपातक्रियेविषयविषक्तिभाव
भंग्योपात्ते।तथायांदृष्ट्वापिसमुत्सुकेमनसिमेनान्याकरोत्यास्पदं।अनदर्शनक्रियाकर्तुर्मनसोऽन्यकर्तृकास्पदक्रियाधिकरणभावेनोपात्त
सौत्सुक्यक्रियाविशेषणभावेनोपात्ता।सर्वेषांचनामपदानांक्रियैवैकाप्रवृत्तिनिमित्तमितिसर्वेपिजात्यादयःशब्दाःक्रियाशब्दाएवेतिकेचित्
ममपितरीतिद्रोणाचार्यो।चतुर्थेतिकर्णात्संरंभमेणोत्कर्के तातेचापेत्यादिपुनरुक्तंप्रधानस्यार्थस्यपूर्वंनिर्देशःक्रमस्तस्याभावोदुःक्रमत्वंयथाभू
यालेति।यदात्वदारसत्वोगुर्वादिबलाद्गृह्यमाणस्तुरंगमित्यादिवक्ष्यतदानदोषः।क्रमानुष्ठानाभावोवादुःक्रमत्वंयथाकाराधिऊणरवउरंगामउ

डोमज्जिऊणजिमिऊणा।नरकन्मतिहिवारेजोअसिअंपुच्छिउंलग्गो।ग्राम्यत्वंयथास्वपिनीतिनिद्राति।स्वपिमीतिकामये।संशयहेतुत्वंसंदिग्धत्वं
यथामात्सर्यमिति।निर्हेतुर्यथागृहीतमितिद्रोणाचार्येणामतेप्यश्वत्थामनिहतोस्वत्थामेतिश्रुत्वेसतशोकात्शस्त्रंमुक्त्वाहतश्वसः ततोऽश्वत्थामा
पिशस्त्रंमुमुक्षुरिदंपपाठ।यतइतिततइत्यत्रार्थे।असिट्ठिकिरुट्ठंयथादृष्टंतेदृष्टिकमलातंकंपद्मविछायतापादकंवदनंयस्याः।कविषुप्रसि
द्धइतिनत्वंकुरीदृमइतिप्रसिद्धिविरोधः।रुद्रटोक्तश्चातिमात्रदोषोऽस्मान्नभिन्नः।अमूर्त्तोपीतियशःप्रभृतीनामर्थानांस्वभावान्यथोपनिबंधे
धेकविप्रसिद्धिःकारणं।विद्याधर्मार्थकाममोक्षशास्त्रंगीतंनृत्तंनाद्यचित्रकर्मादिकाःश्चतुःषष्टिकलाश्च।तद्दिरुट्ठंक्रमाद्यथासदेति।अर्थश
स्त्रेणेतिपाठेप्यनुकरणमेवदंडनीतोहिषड्जयस्यमूलं।अंगनंस्थानं।अष्टांगेतियमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो
ऽष्टौयोगांगानिअहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाःशौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानियमाःस्थिरसुखमासनं।तस्मिन्सति
श्वासप्रश्वासयोर्गतिविच्छेदःप्राणायामःस्वविषयासंप्रयोगेचित्तस्वरूपानुकारइवेंद्रियाणांप्रत्याहारः।देशबंधश्चित्तस्यधारणा।तत्रप्रत्ययैक
तानताध्यानं।तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिः।कालेनंतत्रैवस्थैर्यं।सिट्ठिसविधंनिकटाअपिसिट्ठिः।प्रतिपुरुषमोर्नेर्दृष्टानंवि

येकरव्याप्तिः।समाधिश्चसंप्रज्ञातोऽसंप्रज्ञाश्च।वितर्कविचारानंदास्मितारूपानुगामात्संप्रज्ञातःसमाधिः।वितर्कश्चित्तस्यालंबनेस्थूलआभोगः।सूक्ष्मोवि
चारः।आनंदोल्हादः।एकरूपात्मिकार्थमात्रासंविदस्मिता।विरामप्रत्ययाभ्यासपूर्वःसंस्कारशेषोनिरोधश्चित्तस्यसमाधिरसंप्रज्ञातः।तस्यपरंवैराग्यमुपा
यः।सालंबनोह्याभ्यासस्तत्साधनायकल्पतइतिविरामप्रत्ययोनिर्वस्तुकआलंबनीक्रियतेसचार्थशून्यस्तदभ्यासपूर्वाच्चित्तंनिरालंबनमाभावप्राप्तमिवभ
वतीतिनिर्बीजः।समाधिरित्याहविवेकेति।गीतंचरुद्रेयथा।।श्रुतिसमाधिकमुद्धेःपंचमेपीडयेतःसततमृषभहीनंभिन्नकीकृत्यषड्जं।प्रणिजगदुरकाकु
श्रावकस्निग्धकंठाःपरिणतिमितिरात्रेमागधामाधवाय।श्रुतिसमयकमितिश्रुत्यासमधिकंपंचश्रुतिकमित्यर्थः।पीडयेतइतिश्रुतिन्हासेनास्मीकुर्वे
तइत्यर्थः।भिन्नकीकृत्यषड्जमितिभिन्नषड्जंकृत्वेत्यर्थः।प्रातःकालेभिन्नषड्जोगेयइत्याम्नायात्।अत्रभिन्नषड्जेनमागधीगीतिरुपनिबद्धातस्यांचपंच
मस्यऋषभवदसंभवणवदूरेपुनःश्रुतिसमधिकं।यतोभिन्नषड्जस्येदृक्षणंधांशास्तुधैवतन्यासःपंचमर्षभवर्जितः।षड्जोदीच्यवतीजातिर्भिन्न
षड्जउदाहृतः।धांशाइतिधैवतोंशाः।जातयोह्यष्टादशायन्मुनिःषाड्जीषैवार्षभीचैवधैवत्यथनिषादिनी।षड्जोदीच्यवतीचैवतथास्यात्षड्जकैशिकीत्या
हि।तासांमध्याषापड्जोदीच्यवतीजातिस्तस्याःसकाशादित्यर्थः।पाप्मरहितंकरणागहारादिनिर्वर्त्यंतांडवादिनृत्ततत्रविष्णुगौरीशिवानारंगद्वारचा

रीमहाचारीषुक्रमेणस्तुत्यपनिबंधेपरितोषदित्यन्यथानिबंधेनृत्तकलाविरोधः।पाव्यपूर्वीकारेणध्रुवागीत्यादिकल्पंकराणंगहारादिसाध्यंरसास्यं।ना
टकादिनाद्यंतत्कलाविरोधोयथास्थायिनोर्थेप्रवर्त्तनेभावाःसंचारिणोयथा।रसस्यैकरयभूयांसस्तद्भेनेतुर्महीभृतः।स्थायिनोभावाःसंचारिणश्चम
यथारसस्यार्थेप्रवर्त्तनेनेतद्भेनेतुरितिचशब्दाध्याहारः।तन्ननहिबहवःस्थायिनएकस्यरसस्यार्थेप्रवर्तनेसर्वेषांहिरसानांप्रतिनियताःस्थायिनः।
चित्रकलाविरोधोयथाकालिंगंलिखितमिदंवयस्यंपत्रंपत्रैरपतितंकोटिकंटकश्रि।कालिंगंपतिताग्रकंटकमितिपत्रविदामाम्नायः।ननवीकृतमि
तिकिंतुनदेवोक्तमित्यर्थः।नक्षिति।नवीकृतंयदिदहतीतिअत्रहिस्वभावएवायमितिकिमद्भुतमित्याद्यक्तिभिर्वैचित्र्येणोक्तं।सनियमानियमयोर्विशेषा
विशेषयोःपरिवृत्तिविनिमयोग्रेषुवाक्यार्थेषुनेतथातत्रपरिवृत्तोनियमोऽनियमेनयथायत्रेति।अनुद्विग्नाक्षमिति।अनभिव्यक्ताकारंजगतोपींद्रिया
णियत्स्वरूपंननिर्नेतुंसमर्थानीतिभावः।अभासेनेवमणीकृताअन्येऽश्मनोयेनसचासौरुक्मणिश्च।छायामात्रेत्यक्तेहिछाययेवेतिसनियमत्वंसावधा
रणत्वंगम्यतेनचात्रनोक्तमितिनियमेवाच्येतस्याभासेत्यनियमउक्तः।परिवृत्तोऽनियमःसनियमेनमभावल्कोभोजमिति।सरस्वत्तीनद्यपिशोणोनद
भेदोपिमुद्राअंगुलिमुद्राःवाहिन्यःसेनानद्यश्च।मानसंसरश्च।नियमोनवाच्यइतिअथधारणेहिरूढेएकस्मिन्नेवार्थेशोणशब्दःपर्यवस्यतिनतु

नाभिन्नाःपृथग्भूताःअथवानिकृष्टैरुत्कृष्टाःसहचराभिन्नामिश्रितायत्रेतिसहचराभिन्नत्वंयथाभुक्तेनेति।प्रकाशितंविरुद्धंयत्रसतथायथालग्नमिति।
विधिरयुक्तोयथाप्रयत्नेतिअश्वत्थामादुर्योधनंप्रत्याहशत्रुषुहतेषुज्ञापितःसन्स्तुतिभिरेवयदिपरंबोध्यसेनतुचिंतयासोमोजनपदस्तत्रभवारा
जानःसोमकाःसर्वत्रभविष्यतीतियोगःविधेयमितिज्ञापितइत्यनुवादेवाच्यइतिविधिरयुक्तोबोध्यसइत्यस्यैवविधेयत्वात्।तथात्रैवप्रयत्नेन
वाध्यसइतिविधोवाच्येपरिबोधितइत्यनुवादोप्ययुक्तः।व्यल्कमेणवाच्यमितिनहिवाताहारत्वादधिकोदंभस्तोयकणव्रतंनापिततोधिकंदंभव
त्वंमृगाजिनवसनमिति।व्यल्कमेणचोत्कंदोरप्रकर्षविधत्तेनचतथोक्तमितिविधेयत्वं।नानुवाद्यमितिकिमस्मत्स्त्राणान्दमयसीतिविधोवा
च्येविरहिप्राणदमनेत्यनुवादोयुक्तः।त्यक्तपुनरात्तंयथालग्नमिति।व्रीडादिव्यंजकमश्लीलंयथाहंनुमितिहंतिरिहमैथुनेएतद्वाच्यवस्तुषुप्रयुज्य
मानंश्रोत्रासिप्रतीतिंजनयति।इहान्वयव्यतिरेकाभ्यामर्थस्यैवाश्लीलत्वंपूर्वत्रतुपदवाक्ययोरितिविवेकः।५१॥५२॥५३॥५४॥५५॥५७॥यत्रतुविशेष
प्रतिपत्तयेपुनरुपादानंनतत्रपौनरुक्त्यमित्याह।कर्णावतंसेति।धनुःशब्दइतिज्याशब्देनोक्तार्थापिधनुःश्रुतिःप्रयुज्यतेआरोहणस्यप्रतिपत्तेअन्य
थाज्याकिणचिह्नेनेत्यत्रकेःनवरतदाकर्षणाहितकिणमंडितत्वंदोर्धेनप्रतीयतेवेष्ट्यमानयापिज्ययाकिणस्यसंभवात्।मुक्ताशब्दइतिहारशब्दे

नैवगतार्थःप्रयुज्यतेभुद्देःप्रतिपत्तेये।उत्प्रेक्ष्यमाणस्यस्तनद्वयकर्तृकस्यहासस्यसातिशयधवलताप्रतिपत्त्यर्थंसाधकतमस्यहारस्यैकेवलमुक्तालतावेष्टितत्वप्रतीत्यर्थंप्रयुक्तइत्यर्थः।पुष्पशब्दइतिविद्‌धजनमनोविस्मोभनक्षमकातारत्नोपमानभावेनमालायाउपादानादुत्कृष्टपुष्पग्रथितत्वावगमायप्रयुक्तः।त्यजकरिकलभप्रेमबंधंकरिण्याःअत्रकरिशब्दात्तद्रूप्यावगतिः।करीप्रोढकुंजरस्तद्रूपःकलभइतियत्पुनाविशेषावगतिर्यथाअदादिंद्वायकुंडलेपांडोयमंसार्पितलंबहारः।मालाकारइवारामे।रूप्योषुवर्त्मसुकरंबकलापाःप्रयांतीत्यादौतत्रकेवलारावकुंडलादिशब्दाः।स्थितेष्विति।रूढेरेवायमप्रवादः।जघनकांचीत्यादिशब्दान्नितंबकांचीउष्टकरभेत्यादयस्तथोक्तविशिरप्रयुक्तत्वात्।उत्प्रेक्ष्यमाणस्यकारकस्याविशेषणःप्रयोगःपुनरुक्तः।यथाउद्यानंद्रुतस्तमनोदितोपिगमित्यादौ।सविशेषणस्यतुतस्यनपौनरुक्त्यमित्याहोक्याहजगादेति।गतार्थस्यापीति।विशेषाक्षरंजगादेपिक्रियाविशेषणत्वेपिवाचोवेशिष्ट्यसिद्धेःतातार्थस्यापिवाचमितिविशेषस्योपादानंदुष्टं।नमुक्तमुक्तेवामनेनेतिशेषःचरणत्रेतिचरणत्रैमासादिविशेषणंपदयोरेवसंगच्छतेननुव्रजोस्तनक्रियाविशेषणत्वेविवक्षितार्थप्रतिपत्त्यसिद्धेःपादाभ्यामितिविशेष्यंगतार्थमपिचरणत्रेत्यादिविशेषणासिद्ध्यर्थमुपादेयं॥९६॥७॥यथापवादानाह।ख्यातेर्थइतिप्रसिद्धूर्थेयत्राकांक्षानास्तितत्रनिर्हेतुलक्षणोनदोषःयथाचंद्रमि

कष्टत्वंगुण

तिअत्रकुतोनभुंक्तइतिहेतोर्नोपेक्षा।दोषाणामित्यदुष्टेतियोगः।अद्राक्षीदितिश्रुतिकटुगाविल्याहेतिच्युतसंस्कृतिरुत्रामाणमित्यप्रयुक्तो।प्रकरणादीनामित्यादिशब्दाद्विद्‌धोपिमुग्धइवलज्जाहर्षभयादिषद्हासमुद्भूतविभ्रमोःधमप्रकल्पादिश्च।कष्टत्वमितिश्रुतिकटुत्वंवक्तुर्वैयाकरणस्योचित्यान्श्रुतिकटुत्वंवाक्यदोषोगुणोयथादेधीडितिं।यदाख्यामिति।अत्रेपदविद्याविशारदेत्यनेनवैय्याकरणःसंबोध्यतइतिसएवप्रतिपद्यः।रौद्रेरसेध्यंग्येयथाअंत्रेति।प्राधारःसेकः।कुपितस्यवचसीतिउत्कंगघटमानेत्यादिश्रुतिकटुतत्यादाहृतिमित्यादिचक्रोधाभावेपतत्प्रकर्षेगुणएवेतियोगः।अपघनैरंगैःउल्लाघयन्स्वास्थ्यंनयन्।अप्रयुक्तत्वंपदस्यगुणोयथादेवस्त्रातिभयंहिजास्ततइतःस्नानेननिःकल्मषाः।अत्रामुग्धस्यापिमुग्धस्येवहिजस्यवस्त्रत्वेस्त्रातीति।निहिनार्थेयथासर्वकायंशरीरेषुमत्कोगस्कंधपंचकं।सौगतानामिवात्मान्योनास्तिमंत्रोमहीभृतां।अत्रकर्मणामारंभोपायःपुरुषद्रव्यसंपदेशकालविभागोविनिपातप्रतीकारःकार्यसिद्धिश्चेतिपंचांगानिविज्ञानंवेदनासंज्ञासंस्कारोरूपमेवचशिरश्चरणाद्याख्यस्यहेनस्कंधाःपंचप्रकीर्त्तिताः।।इतिनहिद्यसंवादादोअंगस्कंधपंचकमितिगुणः।येनेतिमाधवपक्षेयेनभ्यस्तंबालक्रीडायामनःशाकटं।अभावेनउरसंतारेणबलिंजितवान्यःकामःसपूर्वमस्तहरणेस्त्रीत्वंनीतः।उद्धृतंभुजंगंकालियाख्यंपीडितवान्।रवेशब्दब्रह्मणिलयःसमाप्तिर्यस्य

साविद्यायेपांते

DR BHAU DAJI

कत्वमिच्छंतिवस्तुनोन्येनवस्तुनेत्यपदादितदाध्येयेनसहसमापत्तिःसमाधिः।तमःअभूद्दोःध्वाज्योतिःशक्तीश्चा।पुराणःघटादिसिद्धेःपूर्वंसिद्धः

अनिदंप्रथमतयाप्रकाशमानश्च।षडधिकेत्यादि।शक्तीनांइच्छाज्ञानक्रियाणांअणव्यादीनांवामाज्येष्टादीनांपरादीनांभूचर्यादीनांकरणेश्वरीणांअका

राद्दिरूपामृतादीनांएवंविधानामन्यासापिमेफलभेदादारोपितभेदपदार्थवपुषांनार्थेन्यग्भावनोद्भावनप्रभुःजयतिआक्षिप्तनमस्काराथोंजयत्य

र्थः।देहबुद्धिप्राणपुर्यष्टादिमितप्रमातृतानिमज्जनात्मबोधप्रमातृभावोन्मज्जनेनसमाविशामित्यर्थः।नचशक्तयःपरस्परपरिहृतवपुषोःपि

त्वेकैकस्याःशक्तेःसर्वशक्त्यात्मतेत्याह।शक्तिभिःपरिणद्धःपरितःसमंताद्बद्धःतेनेशिचादिद्यामपिज्ञाचादिवपुःनचासोदूरेभवतीत्याह।षड

विकाव्याहरणीयंसमुद्रदत्ततच्चेष्टितादि।उत्पन्नेपूर्वसिद्धेबीजंवस्तुचयत्र एवंपूर्वकविसमुत्थेतिसमुद्रदत्तचेष्टितादिवर्णनेप्याधिकाचापं
विदधत्कविःप्रकरणंकुर्यादितितात्पर्यार्थः। नाटकेमयोक्तंवस्तुशरीरंचवृत्तिभेदाश्च। तत्प्रकरणेपियोज्यंसलक्षणंसर्वसंधिषुतु। नानाविभूतिभि
र्युक्तमित्यादिनायत्फलत्वमुक्तंतद्वस्तुशरीरमित्येकप्रवेशकादौ। लक्षणमेकपरिमाणेन्यंकांतरसंधानहेतुषुचप्रवेशेषुयत्प्रयोज्यमुक्तंदिवसा
वसानकार्यंयद्यंकेनोपपद्यतइत्यादितत्सर्वंप्रकरणेपियोज्यं।अतिव्याप्तिनिषेधमाह। विप्रवणिकसचिवानांपुरोहितामात्यसार्थवाहानां।चरितय
न्नेकविधंतज्ज्ञेयंप्रकरणंनाम।नोदात्तनायकरुतंनदिव्यचरितंनराजसंभोगः। वाह्यजनसंप्रयुक्तंतज्ज्ञेयंप्रकरणंनामनेकविधमित्येकरसयुक्तं।

राजोचितसंभोगोविप्रादिषुनकार्यः।राजनियतुचितोंतःपुरजनकंचुकीप्रभृतिरिक्तोबाह्यजनोन्यश्चेटदासादिःप्रवेशकादौकार्यः।तदेवाहदासविदूषकश्रेष्ठि
युतंवेश्यास्त्रीपचारकारणोपेतंमेदकुलस्त्रीचरितंकाव्यंकार्यप्रकरणे तु। कंचुकिविदूषकामात्यानांस्थानेदासाद्यः। वेश्यावाट्येवेश्यास्तत्रयास्त्रीतस्याउप
चारोवेशिकप्रसिद्धःसकारणेयस्यशृंगारस्यतेनोपेतं कुलस्त्रीविषयंचेष्टितंमेदंयत्रेति २। प्रकरणनाटकभेदादुत्पाद्यंवस्तुनायकंनृपतिं अंतःपु
रसंगीतककन्यामधिकृत्यकर्त्तव्यं स्त्रीप्रायान्यतुरंकाललितांभिनयात्मिकास्फुटिहितांगी। बहुनृत्तगीतवाद्यारतिसंभोगात्मिकाचैव राजोपचार
युक्ताप्रसादनक्रोधदंभसंयुक्ता।नायकदेवीदूतीसपरिजनानाटिकाज्ञेया उत्पाद्यंवस्तुचरितंनृपमंतःपुरकन्यांसंगीतकशालाकन्यांवाधिकृत्यप्रा
प्यत्वेनाभिसंधाय।उत्पाद्यंवस्त्विति प्रकरणधर्मीनायकंनृपमितिनाटकधर्मः तथावस्थासंध्यंगार्थप्रकृतिपताकाप्रकरीपताकास्थानांकविर्धकं
प्रवेशकादीन्युभयसाधारणा नियोज्यानि।स्फुटपूर्णातयाविहितानिचत्वार्यपिवैशिक्यंगान्नियत्रास्त्रीप्रयेतिललितेतिबहुनृत्तेतिचवैशिकीयत्ति
वाहृत्यंदर्शितंराजगतेरुपचारेर्व्यवहारैर्युक्ता. प्रासादेति।अन्यामुद्दिश्यव्यवहारेपूर्वनायिकागतेः क्रोधप्रसादौचमेरवइयंभाव्यं।नायकस्य
देवीप्राग्नायिकातथाभिलषितनायिकांतरविषयादूतीतत्संपरिजनंपरिजनसमृद्धिर्यस्यां समवकारस्तुदेवासुरबीजकृतः

प्रख्यातोदात्तनायकश्चैव। अप्रबंधस्तथाभ्रिकपरस्त्रिविद्रवःस्याच्छृंगारः। हादृशनायकबहुलोद्धतादृशनायिकाप्रमाणश्च देवासुरस्यय
द्वीजंफलसंपादनायोपायस्तेनविरचितः यद्यपिदेवापुरुषापेक्षयोद्धतास्तथापिस्त्रापेक्षयागांभीर्यादुदात्तास्त्रिपुररिपुप्रभृतयउच्यंते। कपटोवंचना
मिथ्याकल्पितःसत्यानुकारीप्रपंचःसन्निधायत्रानपराद्धएवंवंचकेनवंच्यतेसएकः यत्रतुवंचनीयोपिसापराधःसद्वितीयः यत्रतुद्वयोर
पिनाभिसंधिदोषोःकस्माच्चतुल्यफलाभिसंधिमतोरप्येकउपचयेनान्येनैकस्त्वपचयेनयुज्यतेसदैवैकतस्तृतीयः। चेतनाचेतनोभयकृतानर्थात्म
नोवस्तुनोयतोविद्रवंतिजनाःसविद्रवः। चेतनाचेतनेगजजलाद्युभयंनगरोपरोधादि। शृंगारस्त्रिधाधर्मार्थकामभेदात्। धर्मोयत्रहेतुःसाध्योवानायि
कात्राभेसधर्मशृंगारएवमर्थकामयोः। हादृशनायकाच्चाष्टादृशनाडिकंचकार्यनिबंधनीयं ।। दिव्यपुरुषाश्रयकृतोद्दिव्यस्त्रीकारणोपगतयुद्धः। रूवि
हितवस्तुनिबद्धोविप्रत्ययकारणश्चैव। उद्धतपुरुषमायःस्त्रीरोषग्रथितकाव्यबंधश्च। मद्यामोगेकार्यंयेपुरुषाद्यत्तयोरसाश्चैव। इहामृगेपितत्स्या
त्केवलमत्रस्त्रियायोगः। संस्फेटोविरोधिनांविद्याधिक्रमसंघर्षजोव्यासंगः। ईहाचेष्टामृगस्येवस्त्रीमानार्थायत्रस्त्रीनिमित्तोत्रत्रारोषः। कार्यशक्ते
नात्रांकउच्यतेतेनैकएवांकः। व्यायोगस्तुविधेयोः कार्यः प्रख्यातनायकशरीरः। अल्पस्त्रीजनयुक्तस्त्वेकाहकृतस्तथाचैव। बहवश्चतत्रपुरुषाच्या

यच्छंतेयथासमवकारे। नतुतत्प्रमाणयुक्तः कार्यस्त्वेकांकएवायं। नचदिव्यनायककृतः कार्योराजर्षिनायकनिबद्धः। युद्धनियुद्धाधर्षणसंघर्षकृतश्चकर्तव्यः
। एवंविधस्तुकार्योव्यायोगोदीप्तकाव्यरसयोनिः। नायकोदीप्तरसोःमात्यसेनापत्यादि। शरीरमितिवृत्तं। अल्पस्त्रीतिचेष्टादिनानतुनायिकादूतादिभिः
कैशिकीहीनत्वात्। एकदिवसनिर्वर्त्ययत्कार्यंतत्रकृतोःतएवैकांकः। समवकारइतिहादशेत्यर्थः। नचेतिदेवानृपारुषयश्चनायकानस्युः। नियुद्धं
नाकुयुद्धंसंघर्षःशौर्यविद्याधनकुलरूपादिकृतास्पर्द्धादीप्तंकाव्यमोजोगुणयुतंदीप्तारसावीररौद्राद्यस्तदुभयंकारणंयस्य। प्रख्यातवस्तुविष
यःप्रख्यातोदात्तनायकश्चैव षड्रसलक्षणयुक्तश्चतुरंकोवैडिनःकार्यः। शृंगारहास्यवर्ज्यैःशेषैरन्यैरसैःसमायुक्तः। दीप्तरसकाव्ययोनिर्ना
नाभावोपसंपन्नः निर्घातोल्कोपातैरुपराऽऽऽऽऽऽऽगेणेंदुसूर्ययोर्यक्तः। युद्धनियुद्धाधर्षणसंस्फटकृतश्चविज्ञेयाः। मायेंद्रजालबहुलोचटुपुरुषोत्थान
युक्तश्च। देवभुजगेंद्रराक्षसयक्षपिशाचावकीर्णश्च। षोडशनायकबहुलःसात्वत्यारभटीवृत्तिसपन्नः। कार्योडिमःप्रख्याताप्राप्तश्रयभावसंपन्नः
उगाधर्षणंहठेनपराभवः। पुस्तलेप्यचर्मवस्त्रादिकृतानिरूपाणि। प्रख्यातवस्तुविषयश्चप्रख्यातःकदाचिदेवस्यात्। दिव्यपुरुषैर्यियुक्तःशेषै
रन्यैर्भवेत्पुमिः। करुणरसप्रायकृतोनिवृत्तयुद्धोद्धतप्रहारश्चस्त्रीपरिदेवनबहुलोनिर्वेदितभाषितश्चैव। नानाव्याकुलचेष्टः सात्वत्यारभटिकै

का०श०टी० शिकीहीनः कार्यः काव्यविज्ञेयः सततंध्रुवास्थितिकांकस्तु। निष्क्रान्तयुद्धोद्धतप्रहाराः पुरुषायत्रव्याकुलश्रेष्ठाभूनिपातविवर्त्तिताद्याः सात्वतीतिसमाहारद्वंद्व गर्भद्वंद्वांतरैतृतीयासमासः। उच्छ्वसेणान्मुरवास्थिर्जीवितंप्राणायासांताऽस्थिकाः शोचंत्यस्त्रियस्ताभिरंकोयस्यसतथा भगवन्नापसविभ्रैरन्यैरपिहास्य वादसंबद्धं। कापुरुषसंप्रयुक्तंपरिहासाभाषणंप्रायं अविकृतभाषाचारंविशेषाभावोपपन्नचरितमिदं। नियतिगतिवस्तुविषयंश्रुद्वंज्ञेयंप्रहसनंतु वेश्यावेट नपुंसकविटधूर्त्तावंधकीचयत्रस्थः। अनिभृतवेषपरिच्छद्चेष्टितकरणंचसंकीर्णं यतिवानप्रस्थगृहस्थैरन्येश्वशाक्यादिभिः शीलादिनाकुत्सितैः पुरु षैरर्थाङ्गवदादिभिः प्रहस्यमानैर्युतंनियतगतिएकरूपंयद्वस्तुनद्विषयः प्रहसनीयलक्षणोर्थोयत्रतच्छुद्धं। अत्रनिर्वचनंपरिहासप्रधानान्याभाषणानिप्रायस्ते नैकस्यैवकस्यचिच्चरितंदुष्टाद्यत्रप्राधान्येनप्रहस्यतेनच्छुद्धं। यत्तुवेश्मादियोगोत्कल्पणंचाकल्पादितदेकद्वारेणानेकवेश्मादिचरितेनहसनीयेनसंकीर्णं स्यात्संकीर्णं।॥ ॥आत्मानुभूतश्रुतिपरसंश्रयवर्णनाप्रयुक्तश्च। विविधाश्रयोहिभाणोविज्ञेयस्त्वेकहार्यश्च। परवचनमात्मसंस्थैपरिवचनैरुत्तरोत्तरग्रन थितेः। आकाशपुरुषकथितैरंगविकारैरभिनयेच्च। धूर्त्तविटसंप्रयोज्योनानावस्थांतरात्मकश्चैव। एकांकोवदुच्चेष्टःसतमेंकार्योबुधैर्भाणः। एकेनपात्रेणाहार्यः सामाङ्किकद्वयंप्रापयितव्योर्थोयत्र। परसंबंधिवचनंस्वयमंगविकारैरभिनयेन। सर्वरसलक्षणाद्युक्तात्सर्गेरष्टादशभिः। वीथिस्यादेकां

DR BHAU DAJI LAD MUMBAI CENTRAL

कांतथैकहार्याद्विहार्यावाएकहार्येत्याकाशपुरुषभाषितैरित्यर्थः। द्विहार्येस्फुक्तिप्रयुक्तिवैचित्र्येण। तथाशब्दाद्वक्रोक्तिसंकुलः॥११॥विष्कंभकप्रवेश करहितोयस्त्वेकभाषयाभवति। अमाकृतसस्कृतयाससदृकोनाटिकाप्रतिमाः सदृकेचनाटिकामिवरतिफलंवृत्तं॥१२॥नाटकादेश्चार्थोपक्षेपकैःसू च्यंपंचभिःप्रतिपाद्येत्। विष्कंभचूलिकांकास्यांकावतारप्रवेशकैः। तत्रवृत्तवर्त्तिव्यमाणानांकथांशानांनिदर्शकः। संक्षेपार्थस्तुविष्कंभोमध्यपात्रप्रयो जितः सोपिमध्यपात्राभ्यांतुसंकीर्णः। यथाकादंबर्यांश्रवलोकिते अंतर्जवनिकासंस्थैःस्त्रीतादिभिरनेकधा। अर्थोपक्षेपणंयत्रक्रियतेसात्वचूलिका यथानेपथ्यंश्राचार्यस्यत्रिभुवनगुरोर्न्यस्तशस्त्रस्यशोकाद्रोणस्याजौनयनसलिलाच्छादिताक्षाननस्या। मोलोपाणिंपलितधवलेन्यस्यकृत्वानृशंसंध ष्टघ्नःस्वशिविरमयंयातिसर्वेसहध्वे। अंकांतपात्रैरंकास्यंकांकस्यार्थसूचनं यथाएषास्मिसौदामिनीभगवतःश्रीपर्वतादुपेत्येत्यादि। बीजार्था युक्तिमानंकोंकेषुप्रयुक्तोंकावतारोगर्भांकश्च। यथावालरामायणेश्रवणैःश्रव्यमानैकैःदृश्यंदीर्घैश्चलोचनैबहुभिः भवदर्थमिवनिबद्धंनाद्यसीता स्वयंवरणं भूतभविष्यच्छेषार्थसूचकोंकद्वयांतर्गतोनुदात्तोक्तानीचपात्रप्रयोजितोंकादौशूरसेन्यादिभाषयाप्रवेशकोयथातत्रप्रविशतश्चेटी एकासहिसंगीदयसालापरिसरेश्रवलोइदा द्वितीयासहितेणकिलमाधवपियवयंसेणमयरंदेणसयलोमद्दणुज्जाणवुत्तंतोभयवदीएनिवेदितो

शोकप्रसादयुद्धादीनिप्रवेशकैःसंधेयानिनप्रत्यक्षाणि।तथारंगप्रसाद्यमधुरैःश्लोकैःकाव्यार्थसूचकैः ऋतुंकंचिदुपादायभारतींवृत्तिमाश्रये
त्। भारत्यंगानिचप्ररोचनाप्रस्तावनादीनि तत्रप्रशंसानउन्मुखीकरणंप्ररोचना।यथाश्रीहर्षोनिपुणःकविःपरिषद्येषागुणगणाग्रहिणीति।सूत्र
धारोनटींविदूषकंमार्षचाभूतेस्वकार्यंप्रस्तुताक्षेपिचित्रोक्त्यायत्तदामुखंप्रस्तावनात्रयथाद्वीपादन्यस्मादपिमध्यादपीति।सूत्रधारेचपूर्वरंगंकृत्वा
गतेप्रविश्यकाव्यार्थस्थापनान्नटःस्थापकः।यत्रचार्थस्यसमाप्तिर्बीजस्यचसंहारःसोवस्कन्धबिंदुरेकाहप्रयोज्येंकः। नाटकमहाकाव्यादेर्यथो
संभवंशरीरारंभीभ्यर्थप्रकृतिपञ्चावस्थासंस्थासमवस्थासंधिवृत्तयःप्रत्येकंपंचसंख्याःप्रवृत्तयश्चचतुर्विंशतिरित्येकाचत्वारिंशल्लक्षणानां तत्रेति
हासाश्रयंकथाश्रयमुत्पाद्येतिवृत्तमुत्पाद्येतिवृत्तमप्रतिसस्कार्येतिवृत्तमितिशरीराणि।प्रमाणंप्रमेयंविमर्शोनिर्णयःप्रवृत्तिरित्येषांपंचानांवीथ
यः एतासुचकथाशरीरोपादानकारणभूताबीजंबिंदुःपताकाप्रकरीकार्यमितिपंचार्थप्रकृतयः।तत्रबीजमिवबीजंयथाबीजमुप्तमंकुरमूलादिना
विसर्पदंतेफलायकल्पतेतथायोमहावाक्यार्थोनायकादिव्यापारभेदादनेकधाविसर्पन्तेफलायस्यात्सबीजंयथाप्राचेतसोमुनिर्विषाप्रथमःकवी
नांयत्प्राबनेरघुपतेःप्रणिनायवृत्तं।भक्तस्यतन्नसमरंतमावापिवाचस्ताःस्फुरप्रसन्नमनसःकृतिनोभजंतं।कथाशरीराख्यापिपुरुज्ञानिपुरोहितामा

त्यादिषुनायकसहायेषुवर्त्तमानआरंभोबिंदुरिवाबिंदुर्यथाघृतबिंदुदुःश्योतन्श्योतन्नग्निज्वलनक्रियायान्प्रविछेदहेतुस्तथाछिन्नविछिन्नेषु
कथाशरीरेष्वनुसंधातविष्कंभकप्रवेशकादिबिंदुर्यथाह्यवत्सारवरदूषणप्रभृतयोवध्यास्तापापस्यमेहाहावत्सविभीषणत्वमपिमेकार्येणहेयःस्थितः
हामद्दत्सलवत्सरावणमहत्पश्यामितेसंकटंचूतेकेकशिहाहतासिनचिरंत्रीन्पुत्रकान्द्रक्ष्यसि।कथांगव्यापिनिसहायेषुवर्त्तमानश्चारंभोनाय
कस्योपकारकःस्वेनचफलेनफलवान्सपताकायथापताकाऽन्यस्यचिन्हरूपेणशोभायैभवंतीत्यस्यापिशोभायैस्यादेवमुपनायकादेश्चरितंप्र
धानस्यात्मनश्चशोभार्थंभवत्पताकायथामूर्द्धाजांबवतोभिवाद्यचरणावापृच्छ्यसेनापतीनाश्वास्याश्रुमुखान्मुहुःप्रियसखान्प्रेष्यान्समादिश्य
च।आरंभंजगृहेमहेंद्रशिखरादंभोनिधेर्लंघनेरहस्तीरघुनाथपादरजसामुच्चैःस्मरन्मारुतिः लघुःपुष्पादिप्रकरःप्रकरीसायथापदार्थाश्रयनादेः
शोभायैस्यादेवंप्रबंधस्यापिऋतुवर्णनादिर्व्यापारःप्रकरीयथा।मैनाकःकिमयंरुणद्धिगगनेममन्मार्गमव्याहतमिति।कथाव्यापिन्यांनायकसहा
यस्यामान्यादेक्रियायामुपलभ्यमानःप्रधानसंबंधीप्रारंभफलविशेषोधर्मार्थकामानामन्यःपुरुषार्थकार्योयथायातोविक्रमबाहुरात्मसमतांप्राप्ते
यमुर्वीन्लेसारंसागरिकेति।कार्यार्थंचप्रवर्त्तमानानायकादयोयंयंक्रियाप्रबंधस्कंधमध्यासतेतस्यदैवपुरुषोभयप्राधान्येक्रमादवस्थाःसस्थाः

का०श०टी० समवस्थाद्वित्रयोव्यपदेशास्तत्रारब्धस्यकार्यस्यत्रारंभयत्नप्राप्त्याशानियताप्तिफलागमाद्वित्रिपंचावस्थाएवमित्तरेपि।एतदुपाद्धिधिकथांशानां मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याबीजविंदाद्यर्थप्रकृतिसंधानात्पंचसंधायः तत्राधिकारिणोनायकादेर्बीजस्ययत्रनिर्देशस्तन्मुखं बाजस्यो द्भाटनंयत्रदृष्टनष्टमिवक्वचित्।मुखन्यस्तस्यसर्वत्रनहैप्रतिमुखंस्मृतं।कार्यबीजरयोर्भेदलाभनाशान्वेषणाद्योयत्रसगर्भः गर्भनिर्भिन्नबी जोर्थःक्रोधव्यसनजोपिचाविप्रलंभकृतोवापिसविमर्शइतिसंज्ञितः क्रियाफलेनसम्यग्योगोनिर्वहणमत्रचाद्भुतोरसःकार्यः हिमादिषुत्तुनस र्वैसंधयः एषांचोपक्षेपादीन्यंगानिचतुषष्टिरन्यतोज्ञेयानि।रूपकादिषुचव्याप्रियमाणानांनायकानांमनोवाक्कायकर्म्मनिबंधनाश्चेष्टावि विशेषाभारत्यारभटीकैशिकीसात्वतीविमिश्राचेतिपंचचत्तयस्तास्तनराश्रयावाकूचेष्टास्त्रीवर्जितासंस्कृतप्रयासरत्तानामियंभारती।पुरुषा चपातपुनर्लघुत्तच्छेद्यमायेंद्रजालक्रोधयुद्धादियत्रसारभटीश्लक्ष्णनेपथ्यास्त्रीगीतनृत्तयुक्ताकामप्रायावाकैशिकी।त्यागशौर्याद्यन्वितानिःशोक भाचाहर्षोत्कटासात्वती।एताश्चक्रमाद्धर्मार्थकाममोक्षंधानाः।उक्तंचशृंगारेकैशिकीवीरेसात्वत्यारभटीपुनः।रसेरौद्रेसवीभत्सेवृत्तिः सर्वत्रभा रती।आरभटादिगुणयुक्तानुमिश्रावेषविन्यासक्रमस्तुप्रवृत्तिः।गेयंतुप्रेक्ष्यंकाव्यंपदार्थाभिनयस्तभावंश्रीगदितादि।यदुक्तंयस्मिन्कुलंगतापत्कः

सरव्याप्तेवर्ण्ययेद्गुणान्।उपालंभंचकुरुतेगेयेश्रीगदितंतुतत्।छन्नानुरागगर्भाभिरुक्तिभिर्यत्रभूपतेः।आवर्ज्यतेमनःसानुमस्रणाडोंबिकाम ता हास्यप्रायंप्रेरणंतुस्यात्प्रहेलिकयान्वितं।ऋतुवर्णनसंयुक्तंरामाक्रीडंतुभाष्यते।मंडलेनतुयन्नृत्तंस्त्रीणांहल्लीसकंतुतत्।एकस्तत्रतु नेतास्याद्गोपस्त्रीणांयथाहरिःअनेकनर्तकीयोज्यंचित्रतालल्यान्वितं।आचतुःषष्टियुगलाद्रासकंमस्रणोद्भते।गोष्ठेयत्रविहृतश्चेष्टितमिहके टभद्विषःकिंचित्।रिष्टासुरप्रमथनप्रस्तुतिनदिव्यंतिगोष्ठीति।यस्यपदार्थाभिनयंललितलयंसद्सिनर्त्तकीकुरुते।नृत्तर्तनकंशास्यास्य छलितद्विपद्यादि।त्रिविधश्चगेयकाव्यप्रयोगोमस्रणउद्भतोमिश्रश्च

उपकुर्वंतितमित्यादिनारसस्यांगिनोयदंगबद्धाद्यर्थोतदाश्रिताअलंकाररसमुपकुर्वंतीतिसामान्यलक्षण मुक्तमथविशेषमाह।शब्दालंकारानिति।आर्थापेक्षयाशब्दस्यप्रतीतेरंतरंगत्वात्प्रथमंशब्दालंकारनिर्देशः।तत्रवक्रोक्तिरनुप्रासोयमकंश्लेषोथचित्रंच।पुनरुक्तवदाभासःशब्दालंकरणानिषट्।अन्यथैत्यन्यार्थघटनयातथेतियथाश्लेषेणकाकस्यवाचाकस्ययोगस्तथावक्रोक्तिरपिताभ्यांयु क्ताद्विधा।नारीणांस्त्रीणांनम्ररिणामित्यन्यथाप्रयुक्तं।जानासीत्येकस्योक्तिः।कश्चेतनइत्यन्यस्य।वामानांप्रतिकूलानांस्त्रीणांचहितरूर्दिपुनराद्यस्यो स्यादि

क्तिः हितंकरोतिकृंततिच। अबलानांस्त्रीणांदुबलानांच। बलाभावेनप्रसिद्धात्मनोदुबलस्यदैत्यस्यविनाशेनप्रसिद्धात्मनइंद्रस्यतुर्यपादत्राद्यस्योक्तिः। पु
रंदरस्यमतमभिमतंतस्यच्छेदं। दारुणाक्रूरात्रयोगुणाः सत्वरजस्तमोलक्षणायस्याः। अत्राद्येर्द्वैदारुणेतिप्रथमोतंप्रक्रांतंश्लेषभंग्यात्तृतीयांततो
यादितमभंगेन। नेष्यतीतिकाक्वाणध्वनेव। एतद्वाक्यंनायिकयात्रागमननिषेधपरत्वेनोक्तं। तत्सख्यालुकाकुप्रयोगेणविधिपर्यंततांप्राप्तिं का
कुवशाद्विधिनिषेधयोर्विपरीतार्थसंक्रांतिः। यावद्वीयस्तभिप्रायवान्पाठधर्मः काकुः सकथमलंकारीस्यादितिनकाकुवक्रोक्तिमाह। वक्रोक्तिश्चाल
ंकारसामान्यवचनोपीहालंकारविशेषेसंज्ञितः॥ ७६॥ प्रकृष्टइत्यदूरांतरितः वृत्तिरितिरसानुगुणौचित्यवानुञ्छाश्रयोव्यापारः। अने
कस्यार्थादिति यद्येकस्येवरेफादेर्वर्णस्यैकवारमेकेनरेफादिनासादृश्यमुपनिबध्यतेततः किंयोचित्यंस्यादितिभावः। ततोरुणेति। अत्ररुरिन्द्रीत्या
देरनेकस्यसकृत्साम्यं। परइति। वृत्त्यनुप्रासः यथाममैवदूरागाधभवांधकूपकूहरकामतमः कर्दमक्रोडांतःपरिलीनदीनवपुषःपाठीनपोतानिव। जंतून्
यस्तरितंनिजोद्धुरकरैरुद्धृत्यलोकंपृणेः प्रीणान्निर्मलशर्मवारिभिरभिप्रेयायभूयात्सम्। अत्रैकस्यानेकस्यचावृत्तिः। अनेकस्यासकृद्यथा
सर्वाशारुधिरांधवीरुधिसदासारंगवक्रुधीत्यादेरनेकस्यबहुत्वं। वृत्त्यनुप्रासइतिवर्त्ततेनुप्रासभेदात्रास्यामितिवृत्तिरुपनागरिकापरुषाको

मलेतिमस्णदीप्तमध्यमवर्णानीयोपयोगित्वात्तद्विषयेनुप्रासउपनागरिकाख्यनुप्रासः॥ ७७॥ तत्रेतिवृत्त्यनुप्रासेवर्णैकरितिश्चरसिनिजवर्गा
त्ययुक्तैः कादिभिर्मांतैरटवर्गैः। उपनागरिकेति। नागरिकायाविद्ग्धायाउपमितासाचशृंगारादौ। परुषेतियदुक्तंशाषाभ्यांरेफसंयोगेष्टवर्गेणचयो
जिता। परुषानामवृत्तिःस्यात्लह्रस्वाद्यैश्चयोजिता। साचरौद्रादौकोमलातुहास्यादौ। वृत्तयश्चरसादित्यत्रार्थेनविवेशिताः कामपिछायामावहंति
रसादयोहिशब्दार्थशरीरस्यकाव्यस्यजीवितं यच्चवृत्तयःकाव्यमात्रकाइत्युक्तंमुनिनातत्ररसोचितश्चेष्टाविशेषएवचासिर्यदाह कैशिकीस्निग्धाने
पथ्याशृंगाररससंभवेत्यादि। रागिणितंतोरुणेत्यादौ। नामेवेतिवैदग्ध्यविहीनस्वभावसुकुमारापरुषनाम्यवनितासादृश्यात्। एवमनेकस्यसकृ
दावृत्तेश्चवृत्त्यनुप्रासः॥ ७८॥ शब्दस्तिति शब्दाः पुनः सदृशात्सदृशानुप्रासः। तात्पर्यमन्यपरत्वंतस्मादेवभेदोनशब्दार्थाभ्यामन्वयमात्रेणभि
न्नइत्यर्थः। अन्यइतिवामनादयः॥ ७९॥ ८१॥ सचपंचधातत्राद्योभेदः पदानामिति। यस्यनेतिअत्रयत्पूर्वाद्वेदवदहन्त्वंविधेयंतद्धीनदीधिति
त्वंचानुवाद्यंतत्पूर्वमपक्षनरार्द्वैधिपरीतंज्ञेयं। यस्यनिकटेप्रियास्तितस्यवचनवह्निरपिशीतलइत्यर्थः। अत्रबहूनांपदानांशब्दार्थयोरभेदेसकृत्सा
म्यं। सुधाकरइतिपदस्यसकृदावृत्तिः। अत्रैकःसुधाकरशब्दोवदनोपम्येनोपात्तः द्वितीयस्तुभवनक्रियांप्रतिकर्तृनेतितात्पर्यभेदः अत्राक्षप

का०श०टी० त्रनयनेनयनेनिमीलनेत्यादौ।नुविभक्तावर्थभेदेपिबहुतरशब्दार्थयोरभेदेऽन्वयमात्रभेदादन्त्यानुप्रासएवनयमकं।काशाः काशाइवाभांतीत्या दौत्वनन्वयेनलाटानुप्रासस्यसंकरः।लाटानुप्रासेचशब्दैकंसाक्षादेवप्रयोजकंशब्दालंकारत्वात् अनन्वयेचार्थमात्रगतत्वेनव्यवस्थितेःशब्दैक्य मौचित्यादानुषंगिकं।नाम्नःसारूप्येत्रिविधमाह।यत्नाधिति।तत्रयत्नोतस्मिन्नेवसमासेऽन्यत्रवाद्यत्नोसिन्नेसमासेयत्यत्नयोरितिएकंनामकृत समासमन्यद्वाकृतसमासंतयोःसाम्यं सदृतिलाटानुप्रासः।एतदेवाहएकस्मिन्निति प्रातिपदिकस्येति।अर्थवदधातुप्रत्ययःप्रातिपदिकमि तिसंज्ञितस्य।क्रमाद्यथासितकरेति।कश्चिद्राजानमाहहेक्षितिपतेभास्करसदृशश्चंद्ररश्मिमनोज्ञप्रभाशुभ्राकीर्त्तिःतथापौरुषश्रीःसा वोत्कृष्टलक्ष्मीस्तवेवाच्यस्यनास्ति।अत्रसितकरकरेत्येकस्मिन्समासेतथारुचिरविभाविभाकराकारेतिभिन्नेसमासेतथापौरुषकमलेतिपूर्वे णसमासेकमलासापीत्यसमासेनाम्नःसाम्यं।यथाचाश्रियःपतिःश्रीमतिशासितुंजगज्जगन्निवासाइतिप्रथमोजगच्छब्दःशासनक्रिया कर्मभावाभिधानपरोऽन्यश्चनिवाससंबंधाभिधानपरइतितात्पर्यभेदेपरेणसमासे।नाम्नइतिजातावेकवचनंतेनैकस्यानेकस्यचनाम्नःसकृ दसकृद्वावृत्तिः।तत्रैकस्यसकृदावृत्तोदर्शितं।एकस्यासकृद्यथादशरश्मिशतोपमद्युतिंयशसादिक्षुदशस्वपिश्रुतं।दशपूर्वरथंयमाख्ययादश

कंठारिगुरुंविदुर्बुधाः।अनेकस्यसकृद्यथाजयतिकृष्णमिंतिरस्तिमिरांधैकवल्लभः।वल्लभीकृतपूर्वाशःपूर्वाशातिलकोरविः।तिमिरांधाघूक वर्जाःपक्षिणः।अनेकस्यासकृद्यथावस्त्रायंतेनदीनांसितकुसुमधराःशुक्लसंकाशकाशाःकाशासाभांतिनासांनद्यपुलिनगताःस्त्रीनदीहं सहंसाः।हंसाभांभोदेत्ति।।८०।।यमौद्वौसमजातौनत्प्रतिरूपंयमकं।समरेति।अत्रप्रथमःसमरशब्दःसार्थकोद्वितीयस्त्वनर्थकः।मधुपराजि पराजितमानीत्यादौत्वुभयेषामनर्थकत्वं।नचनदर्थस्यैवशब्दस्यशक्यमुच्चारणंपुनरुक्तदोषादितिसामर्थ्यलभ्येप्यर्थभेदेऽर्थभिन्नग्रहणा द्धोमध्यमद्धोमध्यमित्यादौ।तथाऽदेतिसवितानाम्नस्तान्नएवास्तमेतिचेत्यादौचपोनरुक्त्यदोषाभावेपिनयमकत्वं।सेतितुल्यक्रमेत्यर्थः। तेनसरोरसदित्यादेःप्रतिलोमानुलोमादीनांचयमकत्वनिरुक्तिः।श्रुतिग्रहणंतनुमतोनुमतःसचिवेर्यथाविद्यादीनामसाधुत्वार्थं।अत्र हिविसर्गस्योत्वादौकृतेसत्यपिक्रमेतुल्यश्रुतित्वंनास्ति।तथालोकप्रतीतितुल्यत्वपरिग्रहार्थंच।तेनदंत्योष्ठ्योष्ठ्यषकारादिवर्णभेदेलघु प्रयत्नालघुप्रयत्नतरकृतेचभेदेसंयोगस्थयोःसजातीययोर्व्यंजनयोर्वास्तवेविशेषेयमकंबंधोनविरुध्यते।यथातस्यारिजातंनृपतेरप श्यद्वलंबनं।यथेनि रसंभोगेरपश्यद्वलंबनं।अवलंबनंपाणिग्राहासारादि।प्रपातपानीयास्वादेः।पानीयानित्तनूकुर्वन्अवलसेन्यर

हितं वनंकाननं।अत्रैकत्रवर्णोदंत्योष्ठ्योष्ठ्योऽपरत्रतुओष्ठदंत्योष्ठ्योऽपश्यदित्येकत्रैकः शकारोपरत्रहो। एवमन्यदपि केचिच्चनकारेणकारयोरस्वरमकारनकारयोर्विसर्जनीयस्यभावाभावयोरपिनविरोधदर्शयंतुः यथावेगंहेतुरगणंजयन्नसावेतिभंगहेतुरगाणांनां तपायाद्भरथंधीरसमीरसमरंहसं हिषतांजहिनिःशेषंपृतनाःसमरंहसन् हिषतांमूलमुच्छेतुंराजवंशादजायथा हिषद्भास्यस्यसिकथंबकयूथादजायथा वर्णानामितिबहुवचनमतंत्रंतेनवर्णस्यवर्णयोश्चाचत्तिर्यमकंवर्णस्यचपदांतरगतत्वेनाचत्तिर्नवैचित्र्यकृदितितस्मिन्नेवपादेऽप्रावर्त्यंतरविचित्रतयानेरंतर्येणावृत्तौयमकत्वं यथानानाकारेणकांतभ्रूराराधितमनोभवा विविक्तेनविलासेनततक्षहृदयंनृणां मध्यांतयोरपि उदाररचनारोचिर्भासुरराराजतेकथेति वर्णयोर्यथाभ्रमरद्रुमपुष्पाणिभ्रमप्रीत्येपिबन्मधु काकुंदकुसुमेप्रीतिः काकुंदत्वाविरोधियत्। तस्मिन्नेवपादेयथाहंतहंतरातीनांधीरधीरर्पितातव। कामंकामदकेनीतिरस्यारस्यादिवानिशं। यमकेचपादेतस्यचभागेषुभवदनेकमित्याहपादतद्भागेति।समस्तपादवृत्तितयानियतानियतरूपादेकदेशावृत्तितयाचपूर्वंद्विधा तत्रसमस्तपादवृत्तियमकभेदानाह। प्रथमोद्वितीयादाविति।अत्रशब्दात्तृतीयचतुर्थपादग्रहः। यथा ९ ९ ९ एतानिकमान्मुखसंदंशावृत्तिसंज्ञानि द्वितीयस्तृतीयादाविति आदिशब्दाच्चतुर्थपादग्रहः। ९।९। इमेकमाद्गर्भसंदष्टकसंज्ञोत्

तीयश्चतुर्थेप्रथमस्त्रिषपीतिस्तृतीयचतुर्थयोःपादयोःसाम्येनथाचतुर्षपिपादेषुसाम्येयथा ९। ९ एतेकमात्सुच्छपंक्तिसंज्ञे। प्रथमोद्वितीयेस्तृतीयश्चतुर्थेइतियथा। ९ एतद्युग्मकं प्रथमस्तुर्येद्वितीयस्तृतीयेत्यथा ९। इदंपरिवृत्तिसंज्ञं। एता ९ निनवापिपादजानि। पादत्रयगतत्वेनत्रियमकं नामिमंतमितिप्र ९ थमोद्वितीयस्तृतीययोर्द्वितीयचतुर्थयोस्तृतीय चतुर्थयोर्द्वियस्तृतीयचतुर्थयोरितिचत्वारोभेदानदर्शिताः।अष्टावृत्तिःश्लोकावृत्तिश्चयथा ९ ९ इमेसमुद्गकमहायमकाख्ये। समस्तपादजंयमकंप्रदर्श्यपादभागावृत्तिंदर्शयितुमाह द्विधाविभक्तइति। प्रथमपादस्यादिभागः प्रथमपादस्यार्द्ध ९ भागः प्रथमपादस्यार्द्धीकृतस्यप्रथममर्द्धंद्वितीयादिपादादिभागेषुद्वितीयतृतीयतुर्यपादानामादिभागेष्वावर्त्यमानंक्रमान्मुखसंदंशावृत्तिसंज्ञानित्रीण्यियमकानिकरोति। पूर्ववदिति। समस्तपादवृत्तियमकक्रमेणेत्यर्थः यथा ९ ९ ९ अंतभागइतिप्रांतभागेधितिचपदेसाकांक्षत्वात्प्रथमपादशब्दंद्वितीयादिपादशब्दंचयथाक्रममनुवर्त्तयतस्तेनापिपूर्वोक्तानाम ९ कंभेदत्रयमंतभागावृत्तीसत्यांलक्षितं ९ ९ ९ शेषंचपादस्यादिभागावृत्तिसंज्ञंभेदसप्तकमंतभागावृत्तिसंज्ञंभेदसप्तकंचइतिशब्देनप्रकारार्थेनसूच्यते यथा ९ ९ ९ ९ ९ ९ ९ एतानिगर्भसंदष्टकपुच्छपंक्तियुग्मकपरिवृत्तिसमुद्गकसंज्ञानिक्रमेण ए

का०श०टी० वर्मंतभागावृत्तेरपिसप्तभेदाद्दृष्ट्वाः नदेवंद्विधाविभक्तेपादेपादस्यादिभागावृत्त्यंतेभागावृत्याचप्रत्येकंदशदशयमकानिस्युरुभयेविंश
ति:नहाविंशतिरित्याह श्लोकांतरेहीतिभागावृत्तेः श्लोकांतरेऽसंमतत्वात् त्रिखंडेत्रिंशत् आदिमध्यांतरूपेषुत्रिभागेषुप्रत्येकंदशकस्यभावा
त्पूर्वोक्तसंख्यानित्रिंशद्यमकानि।एवंचतुर्द्धाविभक्तेपिपादेआदिमध्यमध्यांतरूपभागचतुष्टयेप्रत्येकंदशकतयाचत्वारिंशत्।आद्यभागंपादां
तरस्याद्यभागेमध्यंमध्येऽसंमतेएवभागेआवर्त्तयेदित्यर्थः।अन्यत्रदशेत्यावृत्तौयमकान्याह प्रथमपादादिर्गोत्यार्द्धादिभागइति प्रथमपादआ
दिर्येषामित्यादिशब्दाद्द्वितीयतृतीयपादयोर्ग्रहः नचतुर्थस्यापिपादचतुष्टयेनैवश्लोकस्यसमाप्तत्वात्।पंचमपादस्यचाभावात्नार्द्धावृत्तिरपि
प्रथमपादादीनूगतमाश्रितमंत्यार्द्धमादिर्यस्यसचासौभागश्च अंत्यार्द्धादीत्यादिशब्दात्तृतीयतुर्यपादग्रहः द्वितीयपादआदिर्येषामादिशब्दा
त्तृतीयतुर्यपादग्रहः।द्वितीयपादादीनूगतमाश्रितमाद्यार्द्धमादिर्यस्यसचासौभागश्च।अन्त्यार्द्धादीत्यादिशब्दात्तृतीयतुर्यपादग्रहः। श

इत्यादीत्यादिशब्दाद्विधारुतेपादेप्रथमपादादिगतात्यार्द्धभागोद्वितीयपादादिगतात्यार्द्धभागेयम्यतइत्यन्वर्थादाद्यंतकं तथात्रिखंडेपादेप्रथमपादग

ता द्वितीयभागोद्वितीयपादादिगतांत्यतृतीयभागेयम्यइत्यन्वर्थः।तथाप्रथमपादादिगतमध्यांशोद्वितीयपादादिगतादिभागेयम्यतइत्यन्वर्थः
तथाप्रथमपादादिगतादिभागोद्वितीयपादादिगतमध्यभागेयम्यतइत्यन्वर्थः।तथाप्रथमपादादिगतांत्यभागोद्वितीयपादादिगतमध्यांशेयम्य
तइत्यन्वर्थः।तथाप्रथमपादादिगतमध्यांशोद्वितीयपादादिगतांत्यांशेयम्यतइत्यन्वर्थःश्वगद्यतेतेनक्रमादाद्यंतकंमध्यादिकंआदिमध्यंअंतम
ध्यंमध्यांतकंचयमकंसिद्धं अनेकभेदमंतादिकमितिवक्ष्यमाणभेदत्रयेऽसौतादेर्यमनात्सामान्येनसंज्ञेयं।विशेषवतीत्वंतादेःक्रमेणय
मनादंतादिकमिति आद्यंतयोःक्रमाद्यमनादाद्यंतकमिति।नहूययोगेनत्समुच्चयइति केचित्त्वंतादिकमितिअंतादिकाद्यंतकनत्समुच्चयमध्यादि
कादिमध्यादीनांसर्वेषामपिसामान्येनसंज्ञेयमित्याहुः।अन्येत्वत्रलक्षणवाक्येशेषभेदसंग्रहपरमादिशब्दत्रयंदृष्टांतादिकमित्यत्राप्यंता
दिकादिकमित्यादिशब्दसंभावयंति अंतादिकप्रभृत्यशेषसंज्ञास्वीकाराय सचरुरवकवेगुण्यान्मूरुप्रतोभ्रष्टइतिमन्यंते तत्रद्विखंडेपादेऽता
दिकभेदाःप्रथमपादांत्यार्द्धस्यद्वितीयपादस्याद्यार्द्धेनारब्धोव्यस्ताख्यमंतायथा ∴ तृतीयपादांत्यार्द्धतुर्यपादाद्यार्द्धयोरेकेद्वितीयंव्यस्ताख्यंय
था ∴ नहूययोगेनतृतीयंसमस्ताख्यंयथा ∴ द्वितीयपादांत्यार्द्धस्यतृतीयपादाद्य ∴ र्द्धेनैकेतुर्यमध्याख्यंयथा ∴ समस्तमध्ययोर्योगेपंचमं

वंशाश्चरव्यंयथा ::: प्रथममपादस्याद्यर्द्धेनुर्यपादांत्यार्द्धेनसहावृत्तेवंशेचसतिषष्ठंचक्रकारव्यमंतादिकंयथा))) इत्यंतादिकभेदाःषट्। प्रथमपा
पादांत्यर्द्धस्य तृतीयपादाद्यर्द्धेनावृत्तौकेचित्संभवंतोप्यंतादिकभेदानहृद्याइतिनगणिताः। हिखंडएव पादेआद्यंतकभेदाः प्रथमपा
दाद्यर्द्धद्वितीयपादांत्यार्द्धेकेचेतथातृतीयपादाद्यर्द्धस्यतुर्यपादांत्यार्द्धेनैकेद्विभेदंद्वयंस्तारव्यमाद्यंतकंयथा ::: एतद्वययोगेतृतीयंसमस्ता
रव्यमाद्यंतकंयथा ::: द्वितीयाद्यर्द्धतृतीयांत्यार्द्धेनावृत्तंचतुर्थंमध्याख्यंयथा ::: मध्यसमस्ताद्यंतकयोगे वंशाःपंचमोयथा ::: प्रथ
मार्द्धेनुर्याद्यर्द्धेना वृत्तंवंशश्चक्रकारव्यंयथा))) इत्याद्यंतकंषोढा। प्रथ मपादस्याद्यर्द्धेतृतीयपादांत्यार्द्धेनावृत्तंआद्यंतकंयम कंकु
रुतइत्यादयःसंभवंतोपिभेदानगणिताएवंमध्या दिकादयोप्यहृद्यत्वात्। अथद्विखंडएवपादेसमस्तांतादिकसमस्ताद्यंतकयोगेःर्द्वयप
रिवृत्तिसंज्ञएकएवभेदस्तत्समुच्चयोयथा ><< अथत्रिखंडेप्रथमद्वितीयतृतीयपादानामंत्यस्तृतीयोभागोद्वितीयतृतीयतुर्यपादानामाद्यस्तृती
येभागोयम्यमानःषडंतादिकयमकानिकरो तियथा :::))) एतानिक्रमाद्विंशस्तसमस्तमध्यवंशाश्चक्र
कारव्यानिपूर्ववत्। एवंत्रिखंडएवपादेष्वाद्यंतकभे दाश्चापिषड्यथा :::

समस्तांतादिकसमस्तांद्यंतकयोर्योगेःर्द्वयपरिवृत्त्याख्यएकविधएवतत्समुच्चयोयथा ><< इतित्रयोदशभेदाः। एवंमध्याद्यिकाभेदाअपिपूर्वोक्ताख्याः
षड्यथा ><< ड्यथासम ::: स्तमध्या
दिकस स्तादिमध्ययोर्योगेःर्थपरिवृत्त्याख्यएकएवतत्समुच्चयो यथा
>< एवमत्तेपित्रयोदश। एवमंतमध्यभेदाअपिपूर्वोक्ताख्याएवषड्यथा :::))) एवंमध्यांतकेभेदेत्रपिपूर्वोक्ताख्याः
>< षड्यथा ::: मध्यांतकयोर्योगेःर्द्वयपरिवृत्तिना
माएकएवतत समस्तांतमध्यसमस्त))) त्समुच्चयोयथा :><: एवमेतेपित्रयोदश। तथासमस्तमध्यादिकसमस्तादिमध्यसमस्तांतमध्य
समस्तमध्यांतकानांयुगपद्योगेःर्द्वयपरिवृत्तिप्रयोन्योन्येकोभेदोय >< था ><< एवंत्रिखंडेपादेःतांदिकादयश्चत्वारिंशद्भेदाः। तथाचतुर्द्धाविभ
क्तेपादेषड्भेदमंतादिकंषड्भेदमाद्यंतकंमेकविधस्तत्समुच्चयएतेत्रयोदश >< भेदाहृद्याइतिस्वीक्रियंते। शेषाश्चमध्यादिकाद्यःसंभवंतोपिन
गृह्याइतिनगण्यंते। इदानींतत्रवृत्तिमाहतस्मिन्नेवपादइति। आद्यादीत्यादिशब्दान्मध्यादिग्रहः। मध्यादीत्यादिशब्दान्मध्यांतग्रहः। ततश्चहि



चतुर्थ

त्तिस्तदाव्यस्तरूपएकोभेदःएकश्चपादश्चचतुर्थएवबोद्व्यस्तस्यैवैकस्यशोभादृष्टेः। नत्वन्यत्प्रथमपादाद्त्रयंयथा ∴ | यदाचद्विपादावृत्तिस्तदाषड्भेदायथा ∴ ∴ | एषांचमध्ये
प्रथमचतुर्थावनंतरितौ। द्वितीयतृतीयौत्वंतरितानंतरितौ चतुरावृत्तौचसमस्तरूपौ ∴ ∴ | कोभेदःय
था ∴ इमेचव्यस्तादयःसर्वेद्वादशारुद्रेनतुव्यस्तरूपत्वचतुर्भेदत्वात्पंचदशोक्ताः। अथत्रिधाविभक्तेशब्दे आद्यादिभागस्तत्रावृत्तौमध्याद्यंशोयमभा
नो ∴ दृश्यतेतथात्याद्यंशोमध्यांशोनादिभागोंतभागेनमध्यभागोंतभागेनचसहावृत्तआदिमध्यंत्राद्यंतंमध्यांतंचक्रमाद्यमकंयथा ∴ ∴ |
∴ तदुक्तंस्थानाभिधानभांजित्रीण्यन्यानिसंतियमकानि। आदिर्मध्येंतमध्यांतेचतत्रपरिवृत्तः। तत्रेति। तस्मिन्नेवपादेइत्यर्थः। एषु
चपादमुद्गकवत्प्रत्येकंद्वादशभेदास्तथाद्यादिमध्यस्थैकपादावृत्तौचतुर्थपादगत्वेनव्यस्तरूपएकोभेदः। यथा ∴ ∴ | द्विपादावृत्तौषड्भेदायथा
∴ ∴ ∴ ∴ ∴ ∴ | एषुप्रथमचतुर्थषष्ठान्यनंतरितरूपाद्वितीयतृतीयपंचमश्चांतरिताः। ∴ | त्रिपादावृत्तौचत्वारोभेदा

यथा ∴ ∴ ∴ ∴ | एषुचप्रथमचतुर्थावनंतरितौद्वितीयतृतीयौत्वंतरितानंतरितौचतुष्पदावृत्तौसमस्तरूपएकोभेदोयथा ∴ ∴ | एतेचा
दिम ∴ ∴ ∴ ∴ | न्यन्यस्तादयोद्वादशभेदादर्शिताः। अनेनक्रमेणाद्यंतस्थमध्यांतस्थचप्रत्येकंद्वादशभेदाज्ञेयाः। नदेवं | त्रिखं
खंडेनत्रावृत्तौआदिमध्यांयंतमध्यांतानांषड्विंशद्भेदादर्शिताः। चतुर्द्धाविभक्तेतुपादेआद्यभागःक्रमेणद्वितीयादौद्वितीयस्तृतीयादौतृतीयश्च
तुर्थेभागेइत्येकावृत्तिभेदावलक्षसंदृशाद्यंतकमध्यसंदष्टकशिरवानामानःषड्यथा ∴ ∴ | द्विरावृत्त्यामालाका
चीसमुद्गकसंज्ञायथा ∴ ∴ | त्रिरावृत्तिर्यमकतत्त्वविदांनेष्टा। चतुरावृ
भेदोयथा ∴ ∴ | ए त्यापंक्तिसंज्ञएको
∴ ∴ | तेचदशाव्यस्तभेदाश्चतुर्थैकपादगत्वेनपाद्द्वयगतत्वेनांतरितभेदास्त्रिंशत्अनंतरितभेदाश्चत्रिं
शत् पा ∴ ∴ | दत्रयगतत्वेनांतरितभेदाविंशतिः। अंतरितानंतरितभेदाश्चविंशतिः पादचतुष्टयगतत्वेदृशसमस्तभेदाः। ननश्चवक्रादी
नांचतुर्द्धाविभक्तेपादेतत्रावृत्तौविंशत्यधिकंशतंभेदाः। षट्खंडेषष्टिरित्यनुक्तेःषट्खंडेपादेयमकमनाभिमतमिवास्यग्रंथकृतोन्येस्तुरुक्त्वाद्
द्वाश्चभागानिहापिसर्वंतथारचयेदित्यनेनषट्खंडेपियमकलंस्त्वितं। अनियतेचेति। आद्यिमध्यांतलक्षणाद्दृशादद्वित्रिभागादिलक्षण

देशादर्द्वित्रिभागादिलक्षणादवयवाच्चयद्विलक्षणंतदनियतंस्थानंतत्रस्वेच्छाकृतत्वेनभूयस्तमभेदंतदेतदितिकविशक्तिरव्यापनमात्रफलत्वात्पुरु
षार्थोपदेशानुपायत्वाच्च।काव्यादगदभूततायमकंहिपथ्यत्वनिवर्त्यंशब्दविशेषान्वेषणेनसाध्यमानंरसभंगायेतिसकुमारमतीनांपुरुषार्थेषु
प्रवर्त्तनायरच्यमानंनसुखोपायःयच्छ्लेषादिः यमकानुलोमतद्दितरचक्रादिभिर्दाहिरसविरोधिन्यः।अभिमानमात्रमेतद्दुरधिकादिप्रवाहोवा ×
तत्रप्रथमपादस्तृतीयेनाक्षोयथासत्रारीति। सतीसाध्वीनारीर्विभर्त्तिपोषयतियाऽमानंयातिसंबध्नातियःशिवः।तथासन्नाम्रारीभावःशत्रुगजाय
त्र।तथाभूतोरणोयस्यत्रमायोनिर्देशः।संदेशः। एवंशेषाम्रपिषड्भेदाऽदाहार्याः।प्रथमद्वितीययोस्तृतीयचतुर्थयोःपादयोराक्षोयथाविनायमि
तिकश्चित्कंचिदाह।यमेनमहाजनंनयताम्रात्मसमीपंप्रापयताऽनयताऽनंकुर्वताऽसुखादिनाप्राणभक्षकेणासुखमतीतिसुखादिनाकुशलायकेना
यंमहाजनोऽदीयतासंबंधतकिंभूतोविनासत्पुरुषः। किमपराधेनेत्याहएनोपराधंविनानिरपराधइत्यर्थः।कीदृशोमहाजनोमानमहंकारंसादयतिक्षि
पति।अरंअत्यर्थं।तथा।महेऽत्सवेत्रजंतिक्षिपंतियेदुर्जनास्तान्नुदति.यतमानानांरमणक्रियाव्याक्षेपानासादमनध्वनसायंरातिदशमीतिखंडनक्रि
याविशेषणं। युग्मकं। एवंप्रथमचतुर्थयोर्द्वितीयतृतीययोराक्षोतोयं।भद्राक्षतिर्यथासारक्षनाद्परानेरसकृद्दोरधिका सारक्षनादप

रानेरसकृद्दोरधिका।सादेवीनायतामनंतानवरागरुदभिमतंवस्त्वित्यर्थः।वाग्भूपालनी।उत्कृष्टक्षतेः।अपगतविपक्षाद्विरतंगोरवेणाधिका
सर्वेषांगुरुरित्यर्थः।श्लोकावत्तिर्यथासत्रेति।सतुपूर्वप्रक्रांतोराजाशत्रुसमूहंभरात्।वशेःवर्त्तमानबलरहितंदीर्घाक्रंदंसर्वकालसंगमंप्रापयामास
।अचान्त्रालसंअपितुत्वरितंगच्छन्अस्थीनिनस्यतिउपक्षिणोतिन्प्रस्थितः।अंत्वसंतेत्यधातोरितिवर्जनाद्दीर्घाभावः।सत्वेननतुकुसत्यायेत्यारंभा
स्तेषुरतःअवश्यंनिश्चितंन्प्रबलंवितंन्प्राश्रितंतारवंतरुग्धसनंयेनशत्रुसमूहेनसर्वेषांदारणोयोमानस्तमिच्छतिन्प्रतएवद्वाग्निनासमंस्थि
तंयस्यशब्दश्लेषाद्वास्यमहायमकस्यभेदः शब्दश्लेषेह्येकेनैवप्रयत्नेनबाक्यद्वयमुच्चार्यतेइहतुद्वाभ्यांवर्णानीयवस्तुद्वयंचनास्तीति।द्विखंडेपा
देंऽतभागाक्षतेःसप्तसप्तभेदेषुमध्याद्द्वितीयोभेदोयथाऽनंतेति।वेधाःप्रजापतिः।नवेत्तियांप्रणतेपुरुषेदयांरूपां।अंत्यार्द्धंसंदष्टकं।एवमन्येपिभे
दाऽदाहार्याःनत्रैवपादेनभागेनसहचतुष्पादक्षोपादसमुद्गकाख्ययथायदानतद्दति।यस्याआनतःप्रणतः।अयम्पशुभावहस्यदैवस्यदानतोन
यस्यपाहुण्यस्याःस्वयंनगच्छत्ययं।शिवमीहितंयस्याःशिवेहरेःनुकूलांस्मरेणकामेनामितामपरिक्लिष्टांध्यायामित्तां। तृतीयंसमस्तारव्यमा
ख्यंतकंयथा।सरस्वतीतिवागीश्वरिचित्तसमुद्रेस्थितेमयिसरगच्छप्रसादंमेकुरु।क्षुभ्यतिशयेनच।शरीरमेवकुरुक्षेत्रंनत्रसरस्वत्यारव्येनहि।

का० शा० टी० अत्रैवकुरुक्षेत्रेत्तितृतीयपादस्यांत्याद्दुत्तुर्यपादाद्यद्वेनयम्मतइतिद्वितीयंव्यस्तारव्यमंतादिकंस्तमस्तांतादिकसमस्तादंतकयोर्योगेऽर्द्धपरिवृत्ति
यथासंसारेतिसंसारप्रवृत्तेसार्द्धदर्पेणकामेनचसंसारसारलक्ष्मणारव्यपक्षियुक्ताशरंकांडं नवानिम्रानांसिशाकदानियस्यांचित्राणाधारयं
ती वीनांभ्राणःशब्दोविद्यतेयस्यांतथाभूतानम्रापितुपक्षिशब्दयुक्ताशरत्कृतुः नवानूतना एवंमध्यादिकादिमध्यांतमध्यमध्यांतकंतस्
मद्ध्यानुदाहार्य्याः त्रिखंडेनत्रैवपदेआदिमध्यंयथासरणेनन्यपौनलिनावलिनारिजनः पद्मापद्मासमंतेरुचिंतंरुचिंतंचनिजं ससंग्रामे
प्रयाणेनहेतुनावलवत्त्वेनवेष्टितारिजनः पदंराज्यलक्षणंउपशमाद्धेतोः अनुरूपमाशीर्वचनाद्यंनंयथाघनाघनायंननभाघनाघनानुदारयत्नेति
मनोनुदारयन् सखेदयंतामविलासखेदयन्नहीयसेगोरथवानहीयसे एतत्पथिकस्यप्रावृषिसुहृदाहचक्रुपापश्रावणेमासोवार्षुकमेघा
श्चित्तारयन्नभ्रायमेतिमनोर्थाद्धरिणांपश्चाद्रस्कोठयन्निर्दयंतांकांतांनिर्लीलउद्वेजयन्सर्पवदाचरसियद्वाकियत्तवेतद्बर्लीवर्दान्यूनो
नभवसि मध्यांतंयथा असतामहितोमहितोसुधिसारतयारतया सतमोरुरुचेरुरुचेपरमोभवतेभवते अनकूलोऽतएवपूजितउत्कृष्टत
याबलवत्तयावातदेकसक्तया कम्बिद्वीरःप्रसिद्ध्याविस्तीर्णाकांतयेप्रीतिमुत्पादितवान् प्रहृष्टगजयुक्तायत्तुत्स्यं अनियतेस्थानेयथामधुपे

ति भ्रमरपंक्त्यापराभूतंमानिनीजनस्यमनोयकाभिःतथाभूताःस्कमनसःपुष्पाणितासांसौगंध्यरुक्ष्मींजगाद्धर्त्रभ्रत वारितावारिजाएवविं
स्मयोयत्रस्फुटितानिविकसितान्तिताम्राणिलोहितानितत्तानिविस्तीर्णानिम्रास्रवणानियत्र अत्रनदेशविभागेनावृत्तिर्नाप्यवयवविभागेनयतोद्व
नविलंबितंहादृशाक्षरमेतद्वृत्तं अद्रंचात्रषडक्षराणित्रिभागश्चचत्वार्यक्षराणि अथचप्रथमाक्षरद्वंमुक्त्वात्रीण्यक्षराणियमकितानीत्यनियतस्था
नत्वंजन्यइति यथाविविधवनानानागगद्वेहनानेत्यादौ काव्येतिद्रुदात्तादीनांयुगपदुच्चारयितुमशक्यत्वात् ॥९१॥ वचनानामितिएकवचन
द्विवचनबहुवचनरूपाणां अलंकारइतिअत्रस्थाणुपक्षेविधुभ्रंद्रोविधिश्चद्रेवमित्यकारेकारयोरक्षरयोर्भेदेनश्लेषः पृथुकानांबालानांयेभ्रार्ता
स्वरास्तेषांपात्रंपृथुनिकार्त्तस्वरस्यभाजनानियत्रेत्यादिपदानांभंगः भक्तीति अत्रनीताइतिईहितप्राप्तयेइतिचस्त्रीनपुंसकलिंगयोःश्लेषः महा
निधिरितिचैकवचनद्विवचनश्लेषोपिभाषाश्चसंस्कृतप्राकृतमागधपिशाचभाषाश्चशौरसेनीच षष्ठोल्पभूरिभेदोदेशविशेषाद्पभ्रंशइतिषट्
तासांभिन्नार्थत्वेयुगपदुक्तिःश्लेषस्तत्रसंस्कृतप्राकृतयोर्यथामहेति कश्चिद्यानानीतांगोरींप्रत्याह महदेउत्सवप्रदेस्करेसंभ्रान्तिस्तायत्रदेवविषे
यमित्यर्थः ममेतमुत्कृष्टं अवरक्तसमासंगंम्रानिम्नेतंम्रागमाहरणेम्रागमस्वीकारेतथाहरनिधारय बहुम्रभूतंसरणंप्रसरणंयत्रतंचिन्तस्य

मोहमज्ञानंअवसरेकालेउमेगौरिसहसाऋगित्येव। प्राकृतोन्योर्थः। ममदेहिरसंधर्मेनमोवशांतमःपरिभूतोमाशांगमागमात्संसारावहरणे इतिनः।तथाहेहरबधुशांतुपत्निशरणंत्वंचित्तमोहोःपसरतुमेहंससा। चित्तमोहमितिगुणाद्याःक्लीवइतिप्राकृतेनपुंसकत्वं।एवंसंस्कृतमागध्योः संस्कृतपैशाच्योःसंस्कृतशौरसेन्योःसंस्कृतापभ्रंशयोःश्लेषोज्ञेयः।तथाअर्थैकेद्वित्रिचतुःपंचवर्णाभाषाणांयुगपदुक्तौद्यादिभाषाश्लेषोपितत्र हियोगेपंचदशत्रियोगेविंशतिःचतुर्योगेबिंशतिःपंचयोगेषट्षष्ठियोगेएकः।सर्वमीलनेभाषाश्लेषस्यसप्तपंचाशद्भेदाभवंतिएतेचपूर्वोक्तेभाषा श्लेषभेदेभिन्नार्थत्वेपिदृश्याः।संस्कृतप्राकृतयोर्योगोयथासरलेसहासरागंपरिहररंभोरुमुंचसरंभं।विरसंविरहायासंवोढुनवचिंतमसहं मे।एवंसंस्कृतमागध्योःसंस्कृतपैशाच्योःसंस्कृतशौरसेन्योःसंस्कृतापभ्रंशयाश्चज्ञेयं।एवंद्वियोगांतरेत्रिचतुःपंचयोगेषुचोदाहार्यं षष्ठियोगेय था।अलोलतकमलेचित्तंस्मरस्मकमलालये।पाहिचंडिमहामोहभंगभीमवरानले।हेचंडिदेविरक्ष।अत्रचपल्लक्ष्मिमनःप्रधानपद्मालये।महामो हस्यजन्मलक्षाभ्यस्तायाअविद्यायाभंजनेयदुग्धंबलंतेनाकलंके।वक्ष्यतीतिधारयिष्यतिच।अत्रबहिवच्योःकृंततिकरोत्योश्चप्रकृत्योर्भंगः। स्य तिल्किप्रत्ययोचतावेवोभयत्रापि।प्रत्ययश्लेषोयथारजनीति।सहस्रमितिक्रियाविशेषणं।स्यास्यादितिच।नंदतीतिनंदितानंदिनोगणविशेष

स्यचभावइतित्वतप्रत्ययोःश्लेषः।सर्वस्वमितिहेहरसर्वस्वत्वंसर्वसंभवःसंसारस्तच्छेदनिष्टःनयोएकारयोःसामुख्यंशरीरवर्त्तनंआयासिग च्छसि।अपरोर्थः हरत्रपहरभवसंपद्यस्वनयनिवारयत्र्यायासिखेदकारि।वर्त्तनंवर्त्तिविस्तारयःअत्रस्यादित्याद्योर्विभक्तयोः।वचनश्लेषेनूदाहृतं ।।८२।। एषांप्रकृत्यादीनामविशेषेपिश्लेषःस्यादित्याह भेदाभावादिति।प्रकरणादिनाचाभिधायात्प्रनियंत्रितत्वाद्श्लेषएवनूतुध्वनिः।नोव मोपीतिअभंगःशब्दश्लेषइत्यर्थः।अभंगत्वेनचपूर्वस्मादस्यभेदः।गोत्रशब्दःकुलपर्वतयोःपशावर्ग्यःपतत्रिणिचक्षणउत्सवःतंशकोटिंचद्दा तिशतकोटिनावज्रेणखंडयतिचविबुधाःपंडितादेवाश्चेत्यभंगःश्लेषःशब्दश्लेषः।ननुस्वरितेतित्वरितोदात्तादिस्वरभेदात्प्रयत्नभेदेशब्दश्लेषो यत्रप्रायेणथद्भंगोभवतियत्रतुस्वरितादिगुणभेदोनास्तीत्यभिन्नप्रयत्नोच्चार्यत्वेतिप्रयत्नादिसाम्याद्भंगपदत्वेर्थश्लेषःएवंचप्राक्तेषुलंका रांतरेष्वारभ्यमाणदाढ्यकत्वात्तत्प्रतिभोत्पत्तिहेतुरितिहिप्रकारोप्ययंश्लेषोर्थालंकारइतिकेचित्तथारक्तच्छदत्वंबिंबकचाबहंतीनालंजलेःसं गतामारधानाः निरस्यपुष्पेषुरुचिंसमग्रांपद्मानिरेतुःश्रमणायधैर्ते।अत्ररक्तच्छेदत्वमित्यादौप्रथमार्थद्वयाश्रितत्वादर्थश्लेषोनालमित्यादौचश ब्दद्वयाश्रितत्वाच्छब्दश्लेषःप्रयत्नादिभेदाच्चप्रातीतिकएवशब्दभेदस्ततश्चरक्तच्छदेत्यत्रैकदंतगतफलद्वयन्यायेनार्थद्वयस्यशब्दश्लेषत्वंनालमि

का॰श॰दी॰ त्यत्रतुजतुकाष्ठन्यायेनस्वयमेवशब्दयोःश्लिष्टत्वंइत्यभयरूपोयंमेमर्थालंकारस्तन्निषेधयन्नाहइहेतिशब्दगतत्वेनार्थगतत्वेनचयोविभागोव्यव
स्थादोषादीनांसोन्वयव्यतिरेकाभ्यामेवसतितस्मिन्भवतीत्यन्वयःअसतित्वनभवतीतिव्यतिरेकः। एतदेवतथाहीत्यनेनव्याचष्टेकष्टत्वादयःश
ब्ददोषागाढत्वादयःशब्दगुणाःप्रसादाद्यः।शब्दालंकाराव्यर्थत्वादयोर्थदोषाःप्रौढ्यादयोर्थगुणाउपमादयोर्थालंकाराः।शब्दार्थगतत्वेनव्यव
स्थाप्यंतेततोयमर्थालंकारइतिनवाच्यमन्वयव्यतिरेकाभ्यांगतत्वेनप्रतीयमानत्वात्तथाहिपरगोत्राणामित्यत्रगोत्रादिशब्दप्रयोगोलंकारोगिर्या
दिप्रयोगेतुनेतिशब्दालंकारएवायं यत्रापिभंगत्वमात्रेणार्थश्लेषत्वमभिमतमुद्भटस्यतदपिनैवोपपन्नमित्याहस्वयंचेतिगौरीपक्षेकिसलयवत्ही
यमानाच्यांकराभ्यांशोभतेसरखेनापुंयत्नशक्यफलंतत्रवृध्धानामीहितंप्रददाति।अभंगःशब्दश्लेषइतियोर्थश्लेषतयोद्भटस्यसंमतः नत्वा
द्यस्येतिस्वयंचेत्यस्याभंगत्वमात्रेणार्थश्लेषत्वंनोपपन्नमित्यर्थः तद्यर्थश्लेषस्यनिर्विषयत्वमित्याहार्थश्लेषस्येति।अर्थश्लेषोयथास्तोके
नेति।अत्रहिस्तोकोन्नत्यादीनांशब्दानांस्थानेस्वल्पोच्चैस्त्वादिशब्दायदिनिवेश्यंतेतथापिनश्लेषत्वक्षतिः स्वयंचेत्यत्रतुदीप्रपाणिशब्दोयदिनिवे
श्येतेतदाश्लेषत्वकथापिनस्यात्। यच्चश्लेषस्यद्विविधस्यालंकारांतराणांप्रतिभोत्पत्तिहेतुत्वंतेनोक्तंतदपिनैवेत्याहनचेति।अयमितिस्वयं

वेत्यादि।अत्रहिश्लेषप्रतिभोत्पत्तिहेतुरुपमाश्लेषस्यतुप्रतिभानमात्रेणैवावस्थानंउपमेवप्रधानेत्यर्थस्तेनश्लेषोपमायोपमाननुश्लेषेण। ननुशब्दसाम्यमे
वस्वयंचेत्यादौदृश्यतेनत्वर्थसाम्यमित्याशंक्यशब्दसाम्येपितांसमर्थयितुमाह तथाहीतिकमलमिवेतिकचनीतिदीप्यतेयथाभ्रमनोज्ञत्वगुणदीपनक्रियासा
म्येउभयसाम्येवोपमाउद्भटस्यापिसंमतातथाशब्दमात्रसाम्येपिदृश्यतेयथासकलकलमित्यादौशब्दश्लेषतयासंमतेपरस्यासहकलकलेनवर्तीतसकलाःकलाय
स्यच इहापीतिशब्दालंकारमध्ये।नचसाधारणधर्मप्रयोगशून्येउपमाभविष्यतिमनोज्ञत्वादिसाधारणधर्मसहितेतुश्लेषइतिवाच्यंयतःपूर्णोपमायानिर्विष
त्वंस्यात् तर्हियथास्माकंमतेपूर्णोपमायानिर्विषयत्वंतथाभवतांश्लेषस्यनिर्विषयत्वमित्याशंक्याहदेवत्वमितिपातान्यत्रलुप्तधर्मासंन्याशाआस्थादिशब्दाश्च चामर
स्यमरुतअमराणांमरुतांवायूनांच उपमादीत्यादिशब्दाद्विरोधैकदेशविवर्त्तिरूपकादयःसमानन्यायाःसंगृहीताः अत्रोपमाद्यलंकारविविक्तःशब्दश्लेषस्यविष
मःकस्यतइतिद्वयोरप्यन्यत्रलब्धसत्ताकयोरेकत्रयोगेसंकरेतेचप्राहुरित्याहद्वयोरिति तस्मात्स्वयंचेत्यादौसंकरएवस्यादुद्भटपक्षेःस्माकंतुश्लेषप्रतिभोत्पत्तिहेतु
रुपमैवाभिप्रेतेत्याहउपमायाएवेतिग्रथमिवस्वयंचेत्यादिकः उदाहरणांतरमुद्भटसंमतंदूषयन्नाहनचेति अविंदितिग्रस्फुटप्रतिबिंबितइंदुरविंदुस्तद्वत्सुंदरी
यस्याविंदुभिःसौंदर्यैनास्तितस्याःकथंलावण्यबिंबःप्रसरेदितिविरोधःप्रधानः अत्रहिश्लेषस्यप्रतिभानमात्रेणनुप्ररोहइत्याहनत्वत्रेतिद्वितीयार्थस्येतिनविं

दुरर्थेदुरित्येवंरूपस्य ननु हि तीयार्थप्ररोहेणकिंप्रयोजनंतावतैवश्लेषत्वसिद्धेःतन्नएवंहिश्लेषाभासत्वंश्लेषस्यलक्षणंस्यात्नचैतत्संमतमितिप्रतिपादय
ष्टाहनचेतियथाविरोधाभासोविरोधोननथाश्लेषाभासःश्लेषऽभयार्थप्ररोहेहिश्लेषइत्यर्थः सहृद्योतिवंशःकुलंसएवसहृद्योवेणुःयथाविद्वन्मानसे
त्यत्रराज्ञोहंसरूपेणान्यथानुपपत्याविद्वन्मानसस्यमानससरस्त्वंरूप्यतेसाक्षादनुक्तमपिएकदेशविवर्त्तिचेदंरूपकंमानसस्यमानससरस्त्वरूपणा
याःसाक्षादनुक्तत्वात्।एवमत्रापिवर्ण्यमानस्यमुक्तामणित्वरूपस्यान्यथानुपपत्यावंशस्यकुलस्यवेणुत्वरूपणमनुक्तमपिगम्यतेएकदेशविवर्त्तित्वं
चपूर्ववद्भावनीयमेकस्मिन्देशविशेषेणवर्त्तनात्।एकदेशविवर्त्तिरूपकस्यचास्यपरंपरितरूपकत्वंकाव्यप्रकाशकारमतेश्लोकः।कीर्त्तिश्च
।अत्रोपमेयस्यप्राकरणिकत्वेनोपमानाद्धिक्यमितिव्यतिरेकेष्टोभेदःश्लोकशब्दःश्लिष्टः अनुरागवतीसंध्यादिवसस्तत्पुरःसरः अहोदेवगति
श्चित्रात्तथापिनस्तमागमः,अनुरागोलौहित्यंत्रभिषंगश्च।आगच्छंत्याइवसंध्यायाःकामुकाद्दिवसःपुरःसंमुखंसरतीतिव्याख्येयंनतुपदा
तिन्यायेनाग्नेर्दिवसोगच्छन्निसंध्यापश्चादितिएवंहिवर्षशतेरपिसमागमोनभवतीतिकिंचित्रंअत्रसंध्यादिवसयोरुपमेययोरनुरागवतीत्यादि
श्लिष्टविशेषणमहिम्नासायकयोरुपमानयोर्वैयधिकरण्येबहारप्रतीतिरितिसमासोक्तिरलंकारः।अचलंपर्वतेनिश्चलंचअहीनांसर्पाणांइनंस्वामिनंहीनं

चविषमाग्निरूपाःस्थिराच।अव्यक्तःकृष्णोगतिशून्यश्च।एषुचतुर्षुचत्वारोलंकारानतुश्लेषस्यसर्वालंकारेषु प्रतिभानमात्रं।तथास्ववचनविरोधो
पीत्याहशब्दश्लेषइतियएवेतिशब्दोर्थोवानत्रैवेतिशब्दःहेतुर्थैवावैचित्र्यमित्यत्रस्वयंचपरुषवतामेत्यादावपिशब्दएवकविप्रतिभासंरंभगोचरइति
शब्दालंकारतैव।नचार्थमुखप्रेक्षित्वमेवशब्दानामर्थालंकारत्वनिबंधनमित्याहरसादीति।यच्चैकप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वंसंमतमुद्भटस्यतद्
पिनयुक्तमित्याहविधौचकइति।विचार्यमितिनतुऋगित्येवासूचितव्यं।यत्रतुप्रस्तुताभिधेयपरत्वेपिवाक्यस्यश्लिष्टपदमहिम्नावक्ष्यमाणोपक्षेप्या
र्थनिष्ठंसंस्पृष्टकत्वंतत्रशब्दशक्तिमूलोवस्तुध्वनिर्यथारक्तप्रसाधितभुवःक्षतविग्रहाश्चस्वस्थाभवंतित्यादौ।ततश्चित्रमितियद्यपिक्ष्यक्षरा
णांरषड्वादिसंनिविष्टत्वंतथापिश्रोत्राकाशसमवेतवर्णात्मकशब्दाभेदेनतेषांलोकेप्रतीतेर्वाचकशब्दालंकारत्वं।मारारिःशिवःरामोमुशलीहभमुखोवि
नायकःआसारतुल्येनवेगेनसारउत्कृष्टः।तेषांरामादिप्रभृतीनांभ्रतिःपीडासंघट्टःसमूहःश्रियां संभ्रमोमोहः,मान्यापूज्यारामाणांवरवनितानांसीमा
पर्यंतभूस्ततोन्यारूपवतीनकाचीत्यर्थः।आदिजासर्वेषामादिमा।एतेनश्लोकद्वयेनरवडुः। तथाहिद्राटिकांनरेसाधारणोमा
शब्दःतस्यदक्षिणतोधःक्रमेणवर्ण्योश्चतुर्दशान्यस्येत्ततःशिखायांसाधारणःसाशब्दः।उर्द्धक्रमेणवामतश्चतुर्दशीयावन्माशब्दःसाधारणःएतत्फ

का०श०टी० रुंतस्यैवमाशाद्यस्यदक्षिणपार्श्वेनिःसरणक्रमेणवामतश्चप्रवेशक्रमेणवर्ण्णाःसप्तसप्त एषाद्यादिका ततोमाशाद्यादूर्द्धक्रमेणगेडिकायांकार्य्यावर्ण्णत्रयंउपरिमाशाद्यसाधारणःतस्यदक्षिणतोवामतश्चतथैवचत्वारोवर्ण्णाएतच्चकूलकं ततस्तस्यमाशाद्यस्योपरिवर्ण्णाद्यमेतन्मस्तकं। सामामाशाद्याद्याद्यिःपंचकलोद्विरावृत्ताः सरलेतिसर्वभाषाभिरमागधिकाभिःशारद्वर्णानोयंश्लोकः। सरलोदीर्घःआसमंतात्प्रभूतेनारंभेणचपलानांभ्रमरसेन्यानांश्रारवःशब्दोयस्यांवारलाभिर्हंसीभिर्बहुलाऽमंदारणंप्रतिसोद्योगःकरंदेङ्गलीतीतिकररलाजातोयस्याश्चबहुलेनशुकूपक्षेणनिर्मलावहुत्वालातीतिबहुलाशरत्प्रकांता।एषमुरजबंधः।तथाहिपादश्चतुष्टयेनपंक्तिश्चतुष्टयेकृतेप्रथमादिपादेभ्यःप्रथमपादाद्यक्षराणिचत्वारिचतुर्थादिपादेभ्यःपंचमादीनिचत्वारिगृहीत्वाप्रथमःपादः। द्वितीयपादादाद्याक्षरंद्वितीयतृतीयपादाभ्यांचतुर्थपंचमाक्षरेचतुर्थपादात्तृतीयद्वितीयेतृतीयात्प्रथमंचाक्षरंगृहीत्वाद्वितीयःपादः द्वितीयादष्टमंप्रथमात्सप्तमषष्ठेद्वितीयतृतीयाभ्यांपंचमेचतुर्थात्षष्ठसप्तमेतृतीयादष्टमंगृहीत्वातृतीयपादः चतुर्थात्प्रथमंतृतीयाद्वितीयंद्वितीयात्तृतीयंप्रथमाच्चतुर्थेपंचमे। पुनर्द्वितीयात्षष्ठंतृतीयात्सप्तमंचतुर्थादष्टमंचगृहीत्वाचतुर्थःपादः। भासतेइतिहेप्रज्ञातिशयोत्कृष्टचारुरसेनासमंताद्भातादीप्तादिभाःशोभायायाभावितात्माएकाग्रीकृतहृदयाचादेएवदेवैर्विजिगीषुभिःपंडितैराभायस्याःयतेत्या

DR BHAU DAJI

श्चर्येनिपातःएषोष्टदलपद्मः। तथाहिभाशाद्यकर्णिकास्थानेततोक्षरद्वयेनैकंदिग्दलंनिर्गमप्रवेशाभ्यांभाशाद्यावत्। ततोक्षरद्वयेनद्वितीयंदिग्दलं
निर्गमेनतावतैवदिग्दलंप्रस वेशेनभाशाद्यावत्पुनर्भाशाद्योनिर्गमेणचतदेवाक्षरद्वयमित्यादिनाक्रमेणदलाष्टकमुत्पाद्यं। एवं
द्दिग्दलानिनिर्गमप्रवेशाभ्यांउत्पा द्यानिद्विग्दलानितुप्रवेशेनैवेतिदिग्दलवर्ण्णानांह्यभाशाद्यस्यचाष्टकूलआवृत्तिःप्रस्तारो
रसेतिकोपिराजानमाहयथाहे सारतरवाक्षतःपात्रयतःसारसापृथ्वीसाररसास्तुत्रयतारुविस्तीर्णनयनक्षतत्रायो
र्थागमोयेस्तान्स्यतिविनाशयति सातंसरवन्प्रवनिरक्षतिअतनिनित्यमुद्यमंभजतेनास्तितासउपक्षयोयस्याःतस्यणंतस्तस्त
नूकरणंनतस्योःतस्योद्विस्तारात्। रसतास्तितुशाद्योव्यतिरेकेऽत्रनकेवलमधोधःक्रमेणस्थितानांपदानांप्रातिलोम्येनपिस्थितिर्यावद्भ्रमस्यापितत्रहिप्रथमादि पादाद्यक्षराणिचतुर्थतृतीयद्वितीयप्रथमपादाष्टमाक्षराणिचप्रथमाःप्रथमपादःप्रथमादिपादद्वितीयाक्षराणिचचतुर्थादि
पादसप्तमाक्षराणि द्वितीयपादः। एवंतृतीयषष्ठाक्षरेरुतृतीयःपादःचतुर्थपंचमेश्चचतुर्थःपादः। इहचसर्वेदेवोपलभ्यतइतिभ्रर्द्धभ्रम
स्याप्यवस्थाना सर्वतोभद्रं।यदुक्तंआहुरर्द्धभ्रमणंयदितदिष्टंसर्वतोभद्रंभ्रमणंयदिसर्वतः। अन्येतिमुशलधनुर्बाणशक्तिहल

शूलस्वस्तिकनागपाशचक्रादयः। स्वरव्यंजनस्थानगतिनियमेऽन्येपिचित्रप्रकाराःसंभवंतितत्रस्वरनियमेयथाजयमदनगजदमनवरकरिभगतग
मनगतजननगदमरणभवभयगतरशरण। ह्रस्वैकस्वरं। ह्रस्वत्रिस्वरंयथाक्षितिविजितस्थितिविहितव्रततयःपरगतयः। उरुरुभुर्गुरुदुधुवुर्युधि
कुरवःस्वमरिबलं। एवंदीर्घैकस्वरादिनियमेपि। व्यंजनचित्रंननोननुन्नइत्यादौ। एवंह्रस्वादिव्यंजननियमोपिभूरिणीभर्रिणिरित्यादौ। स्थानमुरःकंठा
दितच्चित्रंयथाअगगोगागकाकेत्यादौकंठस्थानं। एवंह्रस्वादिस्थाननियमेपि। गतिर्गतप्रत्यागतादिकंतच्चित्रंयथा। वारणागगभीरासासारागीगग
णारवा। कारितारिवधासेनानासेधावरितारिकाकरिगिरिदुर्विगाहाऽत्युत्कृष्टाश्चभीगानामप्रासप्रयानांभटसमूहानांजयध्वनियुक्तविहितशत्रुक्षया
स्वार्थेणिग्। अविद्यमानरुत्रासेधोयस्याःसयासहनुध्यध्वमितिवरिताःप्रार्थिताश्चरयोययासायदूनांसेनाह्रिषतांवस्त्रंप्रयातेतिपूर्वेणाभिसंबंधः। अ
त्रायुक्तादयोगतिर्युक्तादयोःप्रत्यागतिरर्हेतेएवैतिपादगतप्रत्यागतः श्लोकगतप्रत्यागतार्द्धभ्रमत्तुरगपदगोमूत्रिकादीनि। तथामात्रा
र्द्धमात्राबिंदुवर्णागतत्वेनच्युतंचतुर्द्धातत्रमात्राच्युतंयथानियतमगम्यमदृश्यंभवतिकिलत्रस्यत्तोरणोपांतकांत्येनयनानंदीवालेंदुःरवेनभवतिसदा। अत्र
मात्रायाउकाररूपायाश्च्यवने। न्यएवार्थोभवतियथाकलत्रस्यतोरणनिकटंराजपथोगंतुंद्रष्टुंचाअशक्योभवतिकुलवधूत्वात्वेश्याहिद्रष्टुंगच्छंतिपश्यंतिच

अत्रचमात्रापगमेपिअकारांतत्वाच्चस्थितिरुच्चारणार्थत्वादकारस्यमात्रकायामपितथान्दुरित्यत्रनकारोव्यंजनंच्युतमित्यर्द्धमात्राच्युतमपितथाचसत्यर्थांतरंस्या
न्यथाकाचित्सखीमाह हेमुग्धकांतोवदनभोनयनानंदीकेनेनभवतितस्मान्मेनंतिरस्कुरुषीतिशेषः। बिंदुच्युतंयथासहंसानलीनारेतिसहकासेनविकासे
नेत्यपि। वर्णच्युतंयथासितमृशिरःस्रजारविमौलिशिरोमणिभूषणेसस्याःशिरिवरुचिरोर्द्धृक्पृथुरुलाटनटेतिलकक्रियाचसा स्फुटविकटाट्टहासल
लितंबद्धंस्मितापशालंचतत् अभिनवमीश्वरोवहतिवेषमहोतुहिनाद्रिजार्द्धयुक्। अत्रगौरीश्वरवर्णनेसिद्धेछंदसिप्रतिपादमाद्याक्षरह्रयपातेत्याक्षरसप्त
कच्युतोचेश्वररूपवर्णनमेवप्रमिताक्षराऽन्ते। यदिवात्राद्याक्षरसप्तकच्युतौअंत्याक्षरह्रयपातेचगौरीवर्णनंद्रवचिलंबितवृत्तेन गूढंचक्रियाकारक
संबंधपादविषयत्वेनचतुर्धाज्ञेयंयथापिबतोवारितयास्यासरितिशरावेणपातितोकेन वारिशिशिरंरमण्यारतिरवेदाद्पुरुषस्येव। अपुरुषस्ययथेतिक्रिया
त्रगोपितशीतंजलंभ्रातरेवापुःपपुरितिप्रकटं। कोपिकंचिदाहशरावेणपात्रेणापिबलःकेनपातितोकोइतिस्मकोक्षत्वात्कर्मात्रगूढमितिकारकगूढमपिहे
एणशरावेणेतिप्रकटं। संबंधगूढंयथानमयागोरसाभिज्ञंचेतःकस्मात्प्रकुप्यसि। अस्थानरुदितैरेभिरलमालोहितेक्षणे अत्रनमेचेतअगोरसाभिज्ञ
मितिसंबंधगूढंपादगूढंयथाद्यवियद्वाम्मिनीनारसंरावविहितश्रुतिः। हैमेषुमालाझरझरभे अत्रविद्युतामिवसंहतिरित्यस्यगूढत्वं एवंप्रश्नोत्तरप्रहेलिका

श्वयथाउद्यन्दिवसकरासौकिंकुरुतेकथयमेमृगाक्षि। कथयानिं दृयतथाकिंकरवाणिक्किणितुकामः।अन्यःप्रतिप्रश्नपूर्वमुत्तरमाह अहिणवकम
लदलारुणिणमोणुफुरंतेणकेणजाणिज्जइतरुणीअणुणिहाणेणअहरेण। मूर्खत्वात्यशब्देनइंद्रस्तस्मैमनुष्यायमह्यं।स्निग्धभणेत्यंतस्यप्रश्नस्य
यस्योत्तरं। अहरेणेतिहेएणअहः। अहरेःनिंद्रन्प्रणश्यत्वंकुरु।अधरेणेतिएतदनेकभाषमनेकवक्त्रंच।प्रहेलिकायथापयस्विनीनांधेनूनांब्राह्मणः
प्राप्यविंशतिं।तार्योदशारसविक्रीयगृहीत्वैकांसमागतः।धेन्वाऊनाएवमन्येपिप्रकाराभाव्यकल्पाः। ९३ आमुरवेइतिनपुनःपरमार्थतःपर्यव
सानेन्यार्थत्वमित्यर्थः अर्थपौनरुक्त्यंदोषःआमुरव्याबभासनंतुपुनरुक्तवदाभासोलंकारः।अर्थपौनरुक्त्यादेवाश्रितत्वादर्थालंकारोयमितिकेचि
दित्याशंक्याहशब्दश्यशब्दालंकारोयमित्यर्थः।अरिबधदाईहाचेष्टायेषांएवंस्तनान्शरिणोधानुष्कान्इरयतीत्यः।स्तनोबंदी।सतामानत्याहेतुभू
तयास्थिरतायांसत्यामगःपर्वततुल्यःअंगनेवारामाउपवनानि।अत्रैकार्थतयाप्रतिभातोदेहशरीरशब्दोव्यनर्थकोसाभंगोरथिस्तनशब्दोतुसार्थ
कावभंगो।तथादानत्यागशब्दोअनर्थकोसभंगो।अंगनारामाइत्यतोत्वनर्थकावभंगोदेहशरीरादिशब्दवच्चिजेनैवरूपेणावस्थितयोरनयोर्भंगा
भावात्।उपलभ्यमानरूपामपिछायानामासुरवेपौनरुक्त्यंप्रतिभासतइत्यभिसंधायनस्येत्यदाहृतं। सुमनसःशोभनचित्तस्यासुमनसोदेवाधिबुधा

श्वएवेत्येकार्थताभ्रमः।एतत्सुधांतापेक्षयातिडंतापेक्षयायथास्त्वंसम्यक्समुन्मील्यहृदिभासिविराजसे।हेदिगंतरजोविकारेहृदिसत्वाख्यंगुणंप्रका
श्यशोभसेअत्रभासिविराजसेशब्दोसार्थकावभंगो।तनुस्वल्पंकरिकुंजरागजश्रेष्ठाःवंदारकनागकुंजरैःपूज्यमानमितिसमासः।बहूनामिपिपुनरुक्तवदा
भासोहृक्षुद्रतनेजइति।तेजसोधामान्याश्रयास्तजस्विनस्तेषांमहउत्सवः।इंद्रःस्वामीहरिःसिंहःजिष्णुर्जयनशीलः।अत्रैकेतितनुशब्दपरिवृत्तौकशब्दे
सतिनायमलंकारइतिशब्दालंकारः शब्दान्वयव्यतिरेकाद् वपुःशब्दपरिवृत्तौअंगशब्देचनहीयतेलंकारइत्यर्थालंकारोयंएवंकरिकुंजरइत्यत्रापिकुं
जरशब्दपरिवृत्तौपुंगवशब्देसतिनायमलंकारोरुधिरशब्दपरिवृत्तौशोणितशब्देसतिनक्षीयतेलंकारइत्यर्थनिष्कृष्टंएवंचशब्दभेदेःर्थानामभिन्नत्वेइवपु
नरुक्ताभासःशब्दार्थायोश्चाभेदेनात्पर्यमात्रभेदेसादानुप्रासःभिन्नार्थानांचश्रुतिक्रमैक्येयमकमितिविवेकः।

शब्दालंकारानुक्त्वार्थालंकारान्रूपमोनत्वयोत्प्रेक्षोसमंदेहोपमोपमो।रूप
काव्यहेतुश्लेषःसमासोक्तिर्निदर्शनो अन्योक्तिरतिशयोक्तिश्चवस्तूपमाद्दिधादृष्टांतोदीपकंमालादीपकंतुल्ययोगिता व्यतिरेकोद्दिभाक्षेपोविशेषोक्तिर्विभावना जातिरर्थांतरन्यासोयथासंख्यंविरोधयुक् व्याजस्तुतिःसहोक्तिश्चपरिवृत्तिर्विनोक्तिक भाविकंकाव्यलिंगंचपर्यायोक्तमुदात्तवत्

समुच्चयोथपर्यायःपरिकरोनुमानतः।व्याजोक्तिःपरिसंख्यान्योन्योत्तरेकारणस्रजा।सूक्ष्मसाराससंगतयःसमाधिर्विषमंसमं।अधिकंप्रत्यनीकंचमीलि
।तैकावलीस्मृतिः भ्रांतिमोश्वप्रतीपेर्ह्येसामान्यंचविशेषवत्।अनुज्ञणस्तद्गुणोव्याघातसंसृष्टिसंकराः एतानद्वाषष्टिंक्रमेणाह।साधर्म्यमितिसमानोधर्मो
ययोस्तेसधर्मणीतयोर्भावः।उपमैवप्रकारैर्वैचित्र्येणानेकालंकारबीजभूतेतिप्रथमंनिर्दिष्टाउपमानेतिउपसमीपेमीयतेक्षिप्यतेस्वसादृश्यप्रायेणादुपमेयं
येनतत्प्रसिद्धमुपमानंयत्तुतेनसमीपेक्षिप्यतेसौंदर्यगुणयोगित्वेनतत्रप्रकरणेःप्रसिद्धंवदनादितदुपमेयं इंदुमुखीत्यादौप्रसिद्धंचंद्राद्युपमानमप्रसिद्धं
तुमुखाद्युपमेयंननुचतनःकुमुदनाथेनकामिनीगंडपांडुना।नेत्रानंदेनचंद्रेणमाहेंद्रीदृग्लक्ष्मलेत्यादौकामिनीगंडादेरप्रसिद्धस्याप्युपमानत्वंचंद्रादेश्चोपमेयत्वं
दृश्यतेसत्यमत्रापिकामयतेप्रियमितियौगिकत्वाश्रयेणकामिनीशब्दास्तीयमानहृदयस्थितदुर्लभमनोहारिप्रियतमायागंडश्चंद्रादप्यधिकचमत्कारकारित
याप्राधान्येनप्रसिद्धइतिरूढिवैचित्र्यावशादेवप्रसिद्धाप्रसिद्धौअर्थाक्रियेतेयेपिप्राकरणिकमुपमेयमप्राकरणिकमुपमानमित्याद्रियंतेतेरपिकविप्रसिद्धिरं
गीकार्यैवतेनसत्वज्ञेयत्वप्रमेयत्वादिसाधर्म्येनोपमातथाकुंभइवमुखमित्यादिश्रृंगारादौचहास्यादौतुनदोषः।कार्यकारणादिकयोःसाधर्म्यस्यासंभवादुप
मानोपमेयभावोरेवसाःधर्म्यभवतीतितयोरेवसमानेनधर्मेणसंबंधउपमासाधर्म्यंचदेशादिभिन्नानांगुणक्रियादिसाधारणधर्मवत्त्वमित्याह

भेदस्मरणमितिस्मृतेर्भेदेस्मृतेरेवेःनोपमानोपमेयत्वेऽन्ययोरवस्थिते।तत्रदेशेनोपमानोपमेययोर्भेदोयथामधुरेवपाटलिपुत्रमाद्यजनपदं।कालेनयथा
वसंतइवहेमंतःकामिनीरूःरवहेतुःगुणेनयथागौरीवश्यामास्वभगा।क्रियायायथानृत्तमिवगमनमस्याःस्वविलासंजात्यायथाविप्रइवक्षत्रियःश्रोत्रिय
द्रव्येणयथाशिवइवकेशवःपूज्यः।समवायेनयथाविषाणित्वमिवदंष्ट्रित्वंहिंस्रे।अत्रसमासवृत्तिहेतुसंबंधाभिधानाप्रतिबंधनात्समवायस्यसंबंधाद्यस्यगुण
स्यहिभावद्रव्येशब्दनिवेशस्तदभिधानेक्षतलादितिप्रत्ययेनसमवायस्याभिधानंतस्यचसत्यप्येकत्वेउपाधिनिबंधनंभेदकल्पनंततश्चविषाणोपाधिकः
समवायउपमानंदृष्टोपाधिकस्तूपमेयः।अभावेनयथामोक्षइवसमाधौदुःखाभावः।मोक्षेदुःखाभावइवसमाधौदुःखाभावइत्यर्थः।धर्मोमनोज्ञत्वादिःउपमा
वाचकाइवत्वायथाशब्दायदुक्तंइवहायथाशब्दाःसमाननिभःसंनिभाः।तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः।प्रतिपक्षप्रतिद्वंद्विप्रत्यनीकविरोधिनः
सदृक्षसदृशसंवादिसजातीयानुबंधिनः।प्रतिबिंबप्रतिच्छंदसरूपसमसप्रभाः।स्वलक्षणसदृक्षाभाःस्वपक्षोपनतोपमा।कल्पदेश्यीयदेश्यादिप्रत्ययप्रतिनिधी
